

Free

# संस्कृतकौमुदी

## षष्ठी कक्ष्या
## (प्राच्यपाठशालानाम्)

**6th Sanskrit Reader**
(Main Language)

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

## పిల్లలూ! కింది అంశాలు చదవండి - సూచనల ప్రకారం చేయండి

- ప్రారంభంలో సన్నివేశచిత్రం ఉంది . ఆ చిత్రాన్ని చూసి వివిధ రకాలైన కూరగాయలను సంస్కృతంలో ఏమంటారో తెలుసుకోండి. ఉపాధ్యాయుని సహాయంతో చిత్రాన్ని గురించి మాట్లాడండి.
- సంసిద్ధతాపాఠాల్లో ఉన్న సంభాషణలను, గీతాలను ప్రతిరోజు అభ్యాసం చేయండి.
- ప్రతిపాఠంలో ముందుగా ఒక చిత్రం ఉంటుంది. ఆ చిత్రాన్ని చూడండి. దాని కింద ఉన్న ప్రశ్నలకు జవాబులను ఆలోచించి చెప్పండి.
- పాఠం చదవడానికి ముందు పాఠ్యాంశచిత్రాలను చూసి పాఠంలోని విషయాన్ని ఊహించండి. చిత్రాల ఆధారంగా సంభాషణలు చెప్పండి.
- ప్రతిరోజు పాఠాన్ని బిగ్గరగా చదవండి. మీ ఉపాధ్యాయుడు చదివేటప్పుడు జాగ్రత్తగా వినండి. మీకు తెలియని పదాలు/చదవలేకపోయిన పదాలను మీ ఉపాధ్యాయుడు ఎలా పలుకుతున్నాడో జాగ్రత్తగా వినండి. మీరు అలా చదవడానికి ప్రయత్నించండి.
- పాఠాన్ని చదివి అర్థం కాని పదాల కింద గీత గీయండి. వాటి అర్థాలను పుస్తకం చివర పదకోశంలో చూసి లేదా ఉపాధ్యాయుని అడిగి తెలుసుకోండి.
- మీ ఉపాధ్యాయుడు పాఠం చెప్పేటప్పుడు జాగ్రత్తగా వినండి, మీకు తెలియని పదాల గురించి / విషయం గురించి తప్పకుండా అడిగి తెలుసుకోండి.
- పాఠం తర్వాత ఇచ్చిన 'ఏతాని కుర్వంతు'లోని అభ్యాసాలను మీ ఉపాధ్యాయుని అడిగి తెలుసుకోండి.
- ఆ తర్వాత మీరే సొంతంగా రాయాలి.
- అభ్యాసాలలో ఇచ్చిన ప్రశ్నలకు జవాబులను గైడ్లలో గాని, ఇతరుల నోటుపుస్తకాలలో గాని చూసి రాయకూడదు. ఎందుకంటే దాని వల్ల మీకు సొంతంగా రాయడం రాకుండా పోతుంది.
- అభ్యాసాలలో ఇచ్చిన వ్యాకరణాంశాలు మీకు అర్థంకావడానికి మొదట ఉదాహరణలు ఇచ్చారు. వాటి ఆధారంగా అర్థం చేసుకొని చేయండి.
- స్వీయరచనా, సర్జనాత్మకవ్యక్తీకరణమ్, పరియోజనాకార్యమ్, ప్రశంసలకు సంబంధించిన అభ్యాసాల గురించి ముందుగా ఉపాధ్యాయుడు చర్చ నిర్వహిస్తాడు. మీరు ఆ చర్చలో పాల్గొనండి. తెలియని విషయాలను అడిగితెలుసుకోండి. తర్వాత మీరే సొంతంగా అభ్యాసాలను రాయండి. అవసరమైతే మీ తోటి వారితో కలిసి చేయండి.
- మీరు రాసిన జవాబులను తరగతిగదిలో చదివి వినిపించండి. చేసిన ప్రాజెక్టుపనులను ప్రదర్శించండి. మీ ఉపాధ్యాయుడు ఇచ్చిన సూచనల ప్రకారం సరిచేసుకోండి. సరిచేసుకున్న తర్వాతనే నోటు పుస్తకాలలో రాయండి.
- పాఠం చివర 'స్వీయమూల్యాంకనమ్' అనే పట్టిక ఉంది. ఈ పట్టికలోని ఒక్కొక్క వాక్యాన్ని చదవండి. చేయగల్గితే **ఔనని**, చేయలేకపోతే **కాదని** గుర్తించండి. మీరు చేయలేని వాటి గురించి మీ ఉపాధ్యాయుని అడిగి మళ్ళీ అభ్యాసం చేయండి.
- పుస్తకంలో 'పఠంతు-నందంతు' పేరుతో మీకోసం కథలు, గేయాలు, ఇచ్చారు. వీటిని మీరే సొంతంగా చదవండి, ఆనందించండి.
- పుస్తకంలో 'ఛాత్రైః సాధితవ్యాని సామర్థ్యాని' ఉన్న పేజిని చదవండి. దీనిలో ఉన్న సామర్థ్యాలనన్నింటినీ మీరు ఈ తరగతి పూర్తి అయ్యేసరికి చేయగలగాలి.
- పాఠశాలలో మీ స్నేహితులతో, ఉపాధ్యాయులతో సంస్కృతంలోనే మాట్లాడడానికి ప్రయత్నించండి.

## एतानि कुर्वन्तु

अधः दत्तानि चित्राणि पश्यन्तु।
पाठेषु एतादृशचित्राणि यत्र यत्र सन्ति तत्र तत्र दत्तानां सूचनानाम् अनुसारं क्रियाः कुर्वन्तु।

### श्रुण्वन्तु, विचिन्त्य वदन्तु



### पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



### लेखनं, स्वीयरचना



पठन्तु-लिखन्तु



चिन्तयन्तु -लिखन्तु

### पदजालाभिवृद्धिः, भाषाक्रीडाः



### व्याकरणांशाः



### सर्जनात्मकव्यक्तीकरणम्



### परियोजनाकार्यम्



### प्रशंसा





### स्वीयमूल्याङ्कनम्



SCERT TELANGANA

# संस्कृतकौमुदी

## षष्ठी कक्ष्या

## (प्राच्यपाठशालानाम्)


**प्रधानसम्पादकः**

**आचार्य विरिवेण्टि मुरलीधरशर्मा**
शिक्षाविभागः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

**सम्पादकः**

**ए.गिरिहरनाथबाबु**
सहाध्यापकः (संस्कृतम्)
प्रभुत्वोन्नतपाठशाला
वेङ्गलरावुनगर्, हैदराबाद्.

**संयोजिका**

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका
राज्यविद्यापरिशोधनशिक्षणसंस्था
हैदराबाद्.


### पाठ्यपुस्तकविकासमुद्रापकसमितिः


**प्रधाननिर्वहणाधिकारिणी**

**श्रीमती बि.शेषुकुमारी**
सञ्चालिका
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**निर्वाहकः**

**डा॥ नन्नूरु उपेन्द्र् रेड्डि**
आचार्यः, विद्याप्रणालिकापाठ्यपुस्तकविभागः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**प्रधानव्यवहारनिर्वाहकः**

**श्री बि.सुधाकरः**
सञ्चालकः
प्रभुत्वपाठ्यपुस्तकमुद्रणालयः,
हैदराबाद्.

## तेलंगाणप्रभुत्वप्रकाशनम्


*सत्यमेव जयते*
*विद्या ददाति विनयम्*

*धर्मो रक्षति रक्षितः*
*कृषितो नास्ति दुर्भिक्षम्*

SCERT TELANGANA



तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19

© Government of Telangana, Hyderabad

*First Published 2012*
*New Impressions 2014, 2015, 2016, 2017, 2018*

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copy right holder of this book is the Director of School Education, Hyderabad, Telangana.

This Book has been printed on 70 G.S.M. SS Maplitho
Title Page 200 G.S.M. White Art Card

**तेलंगाणप्रभुत्वस्य निःशुल्कवितरणम् 2018-19**

*Printed in India*
at the Telangana Govt.Text Book Press,
Mint Compound, Hyderabad,
Telangana.

SCERT TELANGANA

# पुरोवाक्

संस्कृतं भारतीयानां सांस्कृतिकभाषा। अस्माकं प्राचीनर्षीणाम् अपारज्ञानसम्पत्, अपूर्वजीवनानुभवाः क्रान्तिदर्शनञ्च संस्कृतभाषया अभिव्यक्तीकृतम्। संहिताः, उपनिषदः, स्मृतयः, पुराणानि, इतिहासाः, काव्यानि इत्यादिभिः साहित्यस्य विविधरूपैः तेषां महती ज्ञानसम्पत् परम्परागतसंस्कृतिश्च संस्कृतभाषायां सुरक्षिता अस्ति। न केवलं वैदिकाचारसंहितापरं भौतिक-रसायन-गणित-खगोलादिशास्त्रीयविषयाः, व्यक्तेः शीलनिर्माणाय अपेक्षितानि आदर्शजीवनसूत्राणि च संस्कृते महर्षिभिः निक्षिप्तानि। अतः भारतीयायाः सनातनसंस्कृतेः परिरक्षणाय, परिपोषणाय अनुसरणाय च संस्कृतभाषाध्ययनम् अतितराम् आवश्यकम्।

द्रविडभाषाः परित्यज्य सर्वा अपि भारतीयभाषाः संस्कृतादुत्पन्नाः। द्रविडभाषाः अपि संस्कृतेन नितरां प्रभाविताः। बहुभाषाधिगमावसरे संस्कृतभाषा छात्राणाम् अत्यन्तोपकारिणी भवितुमर्हति। अतः भारतीयायां बहुभाषिकतायां संस्कृतभाषायाः स्थानम् अविभाज्यम् अनिवार्यञ्च।

संस्कृताध्ययनेन न केवलम् अन्यभाषाज्ञानं, प्रत्युत गणित-विज्ञान-समाजशास्त्रादिशास्त्रेषु परिनिष्ठितपदानाञ्च अवगमनं सुशकं भवति।

पाठ्यचर्यायां प्रथमभाषया सह संस्कृतस्यापि स्थानं कल्पितं प्राच्यपाठशालासु। 1985 तमवर्षस्य अनन्तरम् अचिरे काले अर्थात् 2009 तमे वर्षे षष्ठकक्ष्यायाः नूतनं संस्कृतपुस्तकं समारचितम्। एतन्मध्ये N C F 2005, R T E 2009, तेलंगाणराज्यस्य विद्याप्रणालिकापत्रम् (2011) इत्येतान् आधृत्य भाषाधिगमस्य मौलिकसूत्राणि समारचितानि। तानि विमृश्य विद्यालयस्तरीया पाठ्यचर्या पुनारचिता। इत्थं नूत्नतया संरचितां पाठ्यचर्यामनुसृत्य ऐषमः प्राच्यपाठशालाधारायां षष्ठ-सप्तमकक्ष्ययोः नूतनसंस्कृतपाठ्यपुस्तके संरचिते। एषु पाठ्यपुस्तकेषु कथाः, सम्भाषणानि, गीतानि, श्लोकाः, निबन्धाः इत्यादिषु दैनन्दिनजीवने प्रयुज्यमानासु भाषाप्रक्रियासु पाठाः रचिताः। पञ्चवर्णरञ्जितमिदं पाठ्यपुस्तकं छात्रेषु संस्कृताध्ययनविषये अभिनवमुत्साहं परिपूरयिष्यतीति निश्चप्रचम्। श्रवण-भाषण-पठन-लेखन-कौशलानां विकासार्थं समुचिताः अभ्यासाः पुस्तकेऽस्मिन् प्रकल्पिताः। तथैव सर्जनात्मकपरियोजनादिकार्याणां विभिन्नाभ्यासाः समारचिताः। प्रत्येकमपि पाठस्यान्ते स्वार्जितज्ञानकौशलादीनां मूल्याङ्कनार्थं समुचितं स्थानं समुपकल्पितमत्र।

संस्कृतभाषाध्ययने अध्यापकानां दायित्वम् इतरभाषाध्यापकानां दायित्वमतिशेते। छात्राः संस्कृतकक्ष्यायामेव संस्कृतं शृण्वन्ति, नान्यत्र। अतस्तेषु संस्कृतसम्भाषणकौशलविकासः सुदुष्करः। अतो हेतोः अध्यापकाः स्वच्छात्रेषु संस्कृतसम्भाषणकौशलविकासार्थं सर्वविधप्रयत्नान् कुर्युः। एतत् मनसिकृत्य पुस्तकेऽस्मिन् सरलसम्भाषणार्थं संसिद्धतापाठाः गीतानि च स्थापितानि।

पाठ्यपुस्तकस्यास्य रूपकल्पने उपकृतवद्भ्यः सम्पादकेभ्यः, अध्यापकेभ्यः, विषयनिपुणेभ्यः, चित्रकारेभ्यः, उट्टङ्केभ्यः संस्थेयं हार्दान् धन्यवादान् व्याहरति। पुस्तकेऽस्मिन् उत्तमकथागीतादीनां सन्निवेशनार्थम् अनुमतिं प्रदाय उपकृतवत्यै संस्कृतभारत्यै विशेषकार्तज्ञ्यम् आविष्करोति।

पाठ्यचर्यायाः रूपकल्पने सहकृतवते देहलीविश्वविद्यालयस्य आचार्यस्य डा. रमाकान्त-अग्निहोत्रिमहोदयाय परामर्शकेभ्यश्च धन्यवादाः। पाठ्यपुस्तकमिदं भाव्यध्ययनाय आवश्यकनैपुण्यं विकासयितुम् उपकरिष्यतीति दृढं विश्वसिमि।

इति

**श्रीमती बि.शेषुकुमारी**
सञ्चालिका
राज्यविद्यापरिशोधनशिक्षणसंस्था, हैदराबाद्

SCERT TELANGANA

# अध्यापकेभ्यः सूचनाः

- पुस्तकेऽस्मिन् छात्रैः साधितव्यानां सामर्थ्यानां सूचिका संयोजिता । तानि सामर्थ्यानि छात्रैः साधितव्यानि इत्यस्मिन् विषये अध्यापकैः दायित्वं स्वीकरणीयम् ।
- प्रथमभागे संसिद्धतापाठाः सन्ति । तेषां साहाय्येन छात्राः मौखिकसम्भाषणानि कुर्युः। तत्र अध्यापकानां दायित्वमधिकमस्ति ।
- प्रत्येकस्मिन् पाठान्ते अभ्यासाः सन्ति । पाठ्यांशबोधनेन साकम् अभ्यासाः विधिना छात्रैः कारयितव्याः। यतः तत्रस्थसामर्थ्यानि तैः साधनीयानि ।
- प्रत्येकं पाठस्यारम्भे उन्मुखीकरणचित्रं/सन्दर्भचित्रम् अस्ति । तत् चित्रमुद्दिश्य छात्रैः सम्भाषणं कारयितव्यम् । दत्तान् प्रश्नान् अतिरिच्य अन्यप्रश्नाः प्रष्टव्याः । तथा उन्मुखीकरणं कृत्वा पाठः पाठनीयः।
- वैयक्तिकरूपेण धारया च छात्रैः पाठ्यांशवाचनं कारयितव्यम् । अध्यापकाः स्पष्टोच्चारणेन पाठं पठित्वा छात्रेषु स्पष्टोच्चारणस्य कल्पनां दद्युः।
- पाठनात् पूर्वमेव श्लोक-गीतादीन् छात्रान् श्रावयन्तु । तेषाम् उच्चारणं गीतालापनं च छात्रैः कारयन्तु ।
- सम्भाषणरूपान् पाठान् साभिनयं पाठयन्तु। तत्र वैयक्तिकनिरीक्षणमावश्यकं भवेत् ।
- व्याकरणम् अनुप्रयुक्तरूपेणैव पाठयितव्यम् । तथा विधिना अभ्यासाः कारयितव्याः ।
- कक्ष्यायां ८०% छात्रैः निर्दिष्टसामर्थ्यप्राप्तेः अनन्तरम् अन्यपाठः पाठनीयः। प्रतिमासं विभाजितकालांशेषु प्रणाल्यनुगुणं बोधनाभ्यासप्रक्रिये निवेदनीये ।
- सामर्थ्यानुगुणाभ्यासानां पाठनार्थं तेषां निर्वहणविधानम् अत्र दीयते ।

  **श्रुण्वन्तु, विचिन्त्य वदन्तु** - सम्पूर्णकक्ष्यायाः कृत्यनिर्वहणम् ।

  **पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु** - गणरूपेण वा वैयक्तिकरूपेण वा कृत्यनिर्वहणम् ।

  **पदजालाभिवृद्धिः, भाषाक्रीडाः** - एतत् गणकृत्यम् । अत्र वैयक्तिकरूपेण निरीक्षणं करणीयम् ।

  **व्याकरणांशाः** - पूर्णकक्ष्यायै कृत्यं निर्वोढव्यम्। अनन्तरं वैयक्तिकरूपेण निरीक्षणमावश्यकम्।

  **स्वीयरचना, सर्जनात्मकव्यक्तीकरणम्, परियोजनाकार्यम्, प्रशंसा** इत्येतानि सामर्थ्यानि उद्दिश्य लेखनार्थं सम्पूर्णकक्ष्यायां सूचनाः देयाः । तदनन्तरं छात्रैः तत्रस्थाः अभ्यासाः कारयितव्याः । छात्रैः लेखनानन्तरं चर्चापद्धत्या समीकुर्यात् । तदनन्तरं स्वीयपुस्तिकासु लेखितुं समादिशेत् ।

  **स्वीयमूल्याङ्कनम्** - तत्रत्यान् अंशान् आधारीकृत्य स्वयं छात्राः मूल्याङ्कनं कुर्युः। तदर्थं ते अध्यापकैः प्रोत्साहनीयाः।
- पाठ्यांशबोधनसमये अधः दत्तानि सोपानानि अनुसरणीयानि ।

  I. **उपोद्घातः** - स्वागतभाषणम्, उन्मुखीकरणम्, शीर्षिकाप्रकटनम्, नेपथ्यम् ।

  II. **पाठ्यांशबोधने / सामर्थ्येषु अवगमनम्** - चित्राण्युद्दिश्य भाषणम्, अध्यापकस्य आदर्शपठनम्, छात्राणां बाह्यपठनम्, छात्रैः अर्थसङ्ग्रहणम्, पाठितविषये चर्चा, अवगमनम्।



SCERT TELANGANA

III. **अवगमनपरिशीलनम्** - पाठितविषयेषु छात्रावगमनपरिशीलनम् ।

IV. **गृहकार्यम्** - (परियोजनाकार्य-प्रशंसा-बोधितविषयाणां सम्बद्धं गृहकार्यम्)

- प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम -

२. पाठं बोधयितुम् आवश्यककालांशाः -

३. साधितव्यानि सामर्थ्यानि -

४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहाः | सामग्री संसाधनानि | छात्रेभ्यः दीयमानः अभ्यासः, गृहकार्यञ्च |
|---|---|---|---|---|
| | | | | |

५. पाठ्यबोधनार्थम् आवश्यकतातिरिक्तसमाचारसङ्ग्रहणम् (अध्यापककृत्यम्)।

६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

- एवम् 'एतानि कुर्वन्तु' इति शीर्षिकागतांशेषु एकैकं कतिभिः छात्रैः कृतमिति परिशीलयेत् । आवश्यकतानुसारं प्रत्याम्नायबोधनं निर्वोढव्यम् ।
- सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material) दृष्ट्वा अभ्यासानां लेखनं न कारयेत् । छात्रैः यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्तेति वदेत् । स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।
- निरन्तरसमग्रमूल्याङ्कनविध्यनुसारं छात्रप्रगतिं प्रतिदिनं निर्धारितसामर्थ्यानां प्रकारेण पञ्जीकुर्यात् । एतदर्थं प्रत्येकपञ्जीकरणपुस्तिका स्थापनीया ।
- निरन्तरसमग्रमूल्याङ्कनविधानेन जूलै, आगस्ट्, नवम्बर्, फिब्रवरीमासेषु आयोज्यमाननिर्माणात्मक-मूल्याङ्कनेषु छात्राणां भागग्रहणपरिशीलनं (१०अङ्काः), लिखितविषयाः (१०अङ्काः), कृतपरियोजनाकार्याणि (१० अङ्काः), लघुपरीक्षा (२० अङ्काः) चेति चतुर्भिः अंशैः छात्रप्रगतिं निधार्य छात्रप्रगतिसूचकपुस्तिकासु पञ्जीकरणं कुर्यात् । एतदर्थं प्रत्येकच्छात्रप्रगतिपञ्जीकरणपुस्तिका समुपस्थापनीया ।
- सेप्टेम्बर्/अक्टोम्बर्, डिसेम्बर्/जनवरी, एप्रिल्मासेषु आयोज्यमानसङ्ग्रहणात्मकमूल्याङ्कनार्थम् अध्यापकैरेव स्वयं सामर्थ्याधारितप्रश्नपत्रं निर्मातव्यम् ।
- सरलसूक्तिभिः, हितोक्तिभिः कक्ष्यायां पाठशालायां च संस्कृतवातावरणं स्रष्टुं प्रयत्नः करणीयः।
- न केवलं कक्ष्यायाम् प्रत्युत बाह्यपरिसरेऽपि लघुसंस्कृतपदैः सम्भाषणं कर्तुं छात्राः प्रोत्साहनीयाः।

SCERT TELANGANA

# वन्दे मातरम्

- बङ्किम्चन्द्र छटर्जी

वन्दे मातरम्, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं वन्दे मातरम्

# पठत संस्कृतम्

- श्री मञ्जुनाथशर्मा

पठत संस्कृतं, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥ पठत॥

ज्ञानवैभवं वेदवाङ्मयम्
लसति भवभयापहारि यत्र मुनिभिरार्जितम्
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाण मुख्यकविभिः ॥ पठत॥

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्
यद्विना जना नैव जानते
भारतीयसंस्कृतिं सनातनाभिधां वराम्॥ ॥ पठत॥

जयतु संस्कृतं संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्
जयतु संस्कृतं, जयतु मनुकुलम्
जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम्॥ ॥ पठत॥

SCERT TELANGANA

# राष्ट्रियगीतम्

- रवीन्द्रनाथ् टागूर्

जनगणमन अधिनायक जय हे!
भारतभाग्यविधाता!
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्गा!
विन्ध्य हिमाचल यमुना गङ्गा,
उच्चलजलधितरङ्गा!
तव शुभ नामे जागे!
तव शुभ आशिष मागे!
गाहे तव जय गाथा!
जनगणमङ्गलदायकजय हे
भारतभाग्यविधाता!
जय हे! जय हे! जय हे!
जय जय जय जय हे!

# प्रतिज्ञा

- पैडिमर्रि वेंकट सुब्बाराव

भारतदेशः मम मातृभूमिः। भारतीयास्सर्वे मम सहोदराः।

अहं मम देशं प्रीणामि। सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम्। तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि। सर्वैः सह सगौरवं व्यवहरामि।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि। जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम्।



तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19

SCERT TELANGANA

# रचयितारः

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी,**
उपन्यासिका,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**डा॥ वि.सुब्रह्मण्यम्,**
उपसञ्चालकः,
संस्कृत अकाडमी,
उस्मानिया विश्वविद्यालयः, हैदराबाद्.

**ए. गिरिहरनाथबाबु,**
सहाध्यापकः (संस्कृतम्)
प्रभुत्वोन्नतपाठशाला,
वेङ्गलरावुनगर्, हैदराबाद्.

**श्रीमती मादिराजु विजयलक्ष्मीः,**
विश्रान्तसंस्कृताध्यापिका,
श्री मलयालस्वामिसंस्कृतपाठशाला,
कोवेलकुण्ट्ल, कर्नूल् जिल्ला.

**डा॥ धूलिपाल रामकृष्णः,**
संस्कृतविभागाध्यक्षः,
मारिस् स्टेल्ला कलाशाला,
विजयवाडा, कृष्णा जिल्ला.

**डा॥ वै.नागेन्द्रम्मा,**
संस्कृताध्यापिका,
श्रीरामकृष्णसंस्कृतपाठशाला,
श्रीकृष्णगीताश्रमम्, प्रोद्दुटूरु, कडप जिल्ला.

**श्रीमती वै.दामोदरम्मा,**
संस्कृताध्यापिका,
चौडेश्वरीदेवीप्राच्यपाठशाला,
कडप.

**तुर्लपाटि शिवरामकृष्णः,**
संस्कृताध्यापकः,
दिल्ली पब्लिक् स्कूल्,
नाचारम्, हैदराबाद्.

**डि.रवीन्द्रः,**
संस्कृताध्यापकः,
भवगवद्गीताविद्यालयः,
वरङ्गल्.

**डा॥ मरुधूरि नरसिंहाचार्यः,**
सहाध्यापकः (संस्कृतम्),
गान्धीजीनगरपुरपालकोन्नतपाठशाला,
विजयवाडा, कृष्णा जिल्ला.

# परामर्शकमण्डली

**कोडेम्पूडि अप्पारावु,**
संस्कृतोपन्यासकः,
श्री शारदा सन् फ्लवर् जूनियर् कलाशाला,
चल्लपल्लि, कृष्णा जिल्ला.

**डा॥ दोर्बल प्रभाकरशर्मा,**
विश्रान्तप्राचार्यः,
संस्कृतकलाशाला,
कोव्वूरु, पश्चिमगोदावरी जिल्ला.

**श्रीमती एन्.सरोजनी देवी,**
उपन्यासिका,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

**सुवर्ण विनायकः,**
संयोजकः,
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

# चित्रकाराः

**सय्यद् हस्मतुल्ला,** चित्रलेखनाध्यापकः, प्रभुत्वोन्नतपाठशाला, खाजीपेट्, वरङ्गल् जिल्ला.

**कूरेल्ल श्रीनिवास्,** तेलुगु अध्यापकः, जिल्लापरिषदः उन्नतपाठशाला, पोचम्पल्लि, नल्गोण्ड जिल्ला.

**बि.किशोर् कुमार्,** अध्यापकः, प्रभुत्वोवन्नतपाठशाला, अल्वाल, नल्गोण्ड जिल्ला.

**टि.वि.रामकिषन्,** चित्रलेखनाध्यापकः, जिल्लापरिषदः उन्नतपाठशाला, थाड्कपल्लि, मेदक् जिल्ला.

**बीर श्रीनिवास्,** प्राथमिकाध्यापकः, मण्डलपरिषदः प्राथमिकपाठशाला, वेलूरु, खम्मं जिल्ला.

**वड्डेपल्लि वेङ्कटेश्,** प्राथमिकाध्यापकः, प्राथमिकपाठशाला, सोमवरम्, नल्गोण्डजिल्ला.

**जे.वेङ्कट स्वामी,** सहाध्यापकः, प्रभुत्व उपाध्यायशिक्षणकलाशाला, महबूबनगर्

**के.बाबु,** प्राधानाध्यापकः, जिल्लापरिषदः उन्नतपाठशाला, वज्रुपल्लि, निजामाबाद् जिल्ला.

# उट्टङ्कक:

**भुवनगिरि वेङ्कटलक्ष्मीनारायणः,** शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः.

SCERT TELANGANA

# विषयसूची


| पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|
| **प्रथमभागः** | | | |
| संसिद्धतापाठाः | | जून्, जुलै | 1-8 |
| १. सरला संस्कृतभाषा | (गीतम्) | जुलै | 9-18 |
| २. बुद्धिरेवगरीयसी | (कथा) | जुलै | 19-27 |
| ❀ पुत्री मम खलु निद्राति | (गीतम्) | - | 28 |
| **द्वितीयभागः** | | | |
| ३. साहसबालकः | (वास्तविकघटना) | आगष्ट् | 29-36 |
| ४. अग्निः वायुश्च | (श्लोकाः) | आगष्ट् | 37-46 |
| ५. श्रीरामवनप्रस्थानम् | (श्लोकाः) | सेप्टेम्बर् | 47-56 |
| ६. परिवर्तनम् | (कथा) | सेप्टेम्बर् | 57-63 |
| ❀ बलवान् कः | (कथा) | - | 64 |
| **तृतीयभागः** | | | |
| ७. गीतोपदेशः | (श्लोकाः) | अक्टोबर् | 65-72 |
| ८. आयुर्वेदः | (निबन्धः) | नवम्बर् | 73-80 |
| ९. वाटिकां याम | (गीतम्) | नवम्बर् | 81-90 |
| १०. समयस्फूर्तिः | (कथा) | डिसेम्बर् | 91-97 |
| ❀ वेङ्गलप्पस्य अमायिकता | (कथा) | - | 98 |
| **चतुर्थभागः** | | | |
| ११. परिचिन्तय स्वयम् | (प्रहेलिकाः) | जनवरी | 99-106 |
| १२. नवविकासः | (कथा) | फिब्रवरी | 107-116 |
| १३. युगादिः | (निबन्धः) | फिब्रवरी | 117-122 |
| १४. सुभाषितानि | (श्लोकाः) | - | 123-132 |
| ❀ विवेकी एव पण्डितः | (कथा) | - | 133 |
| **पुनश्चरणम्** | | मार्चि-एप्रियल् | |
| **अनुबन्धः** | | | |
| शब्दाः | | | 134-137 |
| धातवः | | | 138-140 |
| पदकोशः | | | 141-148 |
| क्रियापदकोशः | | | 149-150 |


☞ अध्यापकः 'सुभाषितानि' इति पाठे विद्यमानेषु श्लोकेषु प्रतिमासम् एकैकं श्लोकं छात्रैः अभ्यासयेत्।

❀ इत्यनेन चिह्नेन चिह्निताः अंशाः मूल्याङ्कनाय न उपयोक्तव्याः।

SCERT TELANGANA

# अनेन पाठ्यपुस्तकेन छात्रैः साधितव्यानि सामर्थ्यानि

- संस्कृतध्वनीनाम् उच्चारणकौशलसम्पादनं तथा उच्चारणदोषाणाम् अवगमनम्।
- संस्कृते दीयमानसूचनानां, मार्गदर्शकानां, प्रश्नानां च अवगमनसामर्थ्यं सम्पादनीयम्।
- कथा, गीतं, निबन्धः, नाटकं, सुभाषितश्लोकाः इत्यादीन् श्रुत्वा ''श्रूयमाणविषयः एषः'' इति स्थूलरूपेण अभिव्यक्तीकरणसामर्थ्यं सम्पादनीयम्।
- छात्राः पाठस्थपात्राणां मनोभावान्, तेषु अन्तर्वर्तितभेदान् ज्ञातुं समर्थाः भवेयुः।
- छात्राः सरलगद्यांशानां, पद्यानां, कथानां श्रवणमात्रेण भावम् अवगच्छेयुः।
- सरलप्रश्नाः संस्कृतेन प्रष्टव्याः।
- ज्ञाताः-श्रुताः-दृष्टाश्च पठितांशाः क्रमरूपेण वक्तव्याः। तेषां प्रकटीकरणसामर्थ्यं च सम्पादनीयम्।
- संस्कृतसम्भाषणानां प्रदर्शनसामर्थ्यं सम्पादनीयम्।
- सरलवाक्यैः सम्भाषणसामर्थ्यं विकसनीयम्।
- नूतनपदानां सन्दर्भानुसारम् अवगमनसामर्थ्यं भावग्रहणसामर्थ्यं च।
- पदकोशं दृष्ट्वा स्वयम् अर्थानाम् अवगमनसामर्थ्यम्।
- पाठ्यांशैः सह चित्राणां तोलनसामर्थ्यं विश्लेषणसामर्थ्यं च।
- भावानुगुणं श्लोकपठनसामर्थ्यम् अर्थावगमनसामर्थ्यं च।
- संस्कृतवाक्यरचनाशैल्याः, मातृभाषावाक्यारचनाशैल्याः च तोलनसामर्थ्यम्।
- संस्कृत-मातृभाषयोः पदानां मध्ये अर्थभेदावगमनम्,सारूप्ययोः अवगमनपूर्वकं तोलनसामर्थ्यम्।
- संस्कृत-मातृभाषयोः सम्बद्धप्रक्रियाणां तोलनावगनसामर्थ्ये।
- दृष्ट-श्रुत-पठितांशान् अनुसृत्य प्रश्नानां समाधानलेखनसामर्थ्यम्।
- चित्राधारेण सरलसंस्कृतवाक्यरचनासामर्थ्यम्।
- वचनानुसारं संज्ञाक्रियापदानां परिवर्तनसामर्थ्यम्।
- सरलसंस्कृतांशानां मातृभाषया अनुवादकरणसामर्थ्यम्।
- सङ्घटनानुसारं क्रमरूपेण व्यस्तवाक्यानां लेखनसामर्थ्यम्।
- पुरुषत्रये कालत्रये च वचनद्वयमुपयुज्य सरलवाक्यरचनासामर्थ्यम्।
- सन्धिपदानां विघटनसंयोजनसामर्थ्यम्।
- कालानुसारं लकारचतुष्टये क्रियापदप्रयोगसामर्थ्यम्।
- समानार्थकानां, विलोमशब्दानां ज्ञानम्।
- रागभावसहितं गीतानां, श्लोकानाम् गानसामर्थ्यम्।
- स्वीयपरिस्थितेः स्वीयपरिचयस्य च लेखनसामर्थ्यम्।
- दैनन्दिनीलेखनसामर्थ्यम्।
- वस्तूनां प्रतिरूपाणां सज्जीकरणसामर्थ्यम्, तेषां प्रदर्शनसामर्थ्यम्।
- मातृभाषासम्बद्धानां तथा इतरभाषासम्बद्धानां गीतानां कृत्यानां च सङ्कलनावगमनसामर्थ्यम्।
- संस्कृते तथा इतरभाषासु वचनभेदज्ञानावगमनम्।
- पदच्छेद-पदयोजनाभ्याम् उच्चारणे तथा लिप्यां सम्भूयमानानां परिणामानाम् अवगमनं तथा सूत्रीकरणसामर्थ्यञ्च ।



SCERT TELANGANA

प्रथमभागः

# संसिद्धतापाठः

## गीतम् - १

## एहि सुधीर !

एहि सुधीर! एहि सुविक्रम!
खेलनाङ्गणं गच्छाम ।
धावन-कूर्दन-चलनैः खेलैः
वज्रकायतां विन्दाम ॥

एहि सुशीले! एहि मृणालिनि!
पुष्पवाटिकां गच्छाम ।
विविधैः कुसुमैर्विधाय मालां
विघ्नविनाशकमर्चाम ॥



एहि दिनेश! प्रणव! गणेश!
ज्ञाननिधिं सञ्चिनुयाम ।
एहि शारदे! गिरिजे! वरदे!
ज्ञानवारिधौ विहराम ॥

तन्वा मनसा हितं चरन्तः
सदा गुरून् अनुगच्छाम ।
भारतमातुः सेवासक्ताः
देशहितार्थं जीवाम ॥

- जनार्दन हेगडे

SCERT TELANGANA


पलाण्डुः
आलुकम्
कूष्माण्डकम्
कृष्णनिम्बम्
आलुकम्
मरीचम्
गृञ्जनकम्
उर्वारुकम्
भिण्डिः
वार्ताकम्
शिग्रुः
पुष्पकेम्बुकम्

**छात्रैः अधस्तनं चित्रम् उद्दिश्य सम्भाषणं कारयितव्यम्।**

चित्रे महिला बालकेन सह किमर्थम् आगतवती? आपणे के के शाकाः सन्ति? पीतवर्णशाकः कः?

भवतः/भवत्याः समीपापणे के के शाकाः लभ्यन्ते?



# सम्भाषणाभ्यासः - १

## (स्वपरिचयः)

अध्यापकः षष्ठकक्ष्यायां प्रविशति।

छात्राः - महोदय! नमस्काराः।

अध्यापकः - आयुष्मन्तः भवन्तु। एषः प्रथमसंस्कृतकालांशः। सर्वेषां परस्परपरिचयः आवश्यकः। मम नाम दत्तात्रेयः। भवतः नाम किम् ?

रमेशः - मम नाम रमेशः ।

अध्यापकः - भवत्याः नाम किम् ?

प्रतिमा - मम नाम प्रतिमा ।

अध्यापकः - मम जनकस्य नाम महेशः, मम जनन्याः नाम कला । भवतः जनकस्य जनन्याः च नाम किम् ?

गोपालः - मम जनकस्य नाम जगन्नाथः। मम जनन्याः नाम गौतमी।

अध्यापकः - भवत्याः जनकस्य जनन्याः च नाम किम् ?

भाग्या - मम जनन्याः नाम सत्यवती। मम जनकस्य नाम सत्यनारायणः।

अध्यापकः - अहं गान्धीनगरे वसामि । भवान् कुत्र वसति ?

प्रसादः - अहं आटोनगरे वसामि ।

अध्यापकः - भवती कुत्र वसति ?

शारदा - अहं गिरिनगरे वसामि ।

अध्यापकः - एवं सर्वे परस्परं परिचयं कुर्वन्तु।

SCERT TELANGANA

# सम्भाषणाभ्यासः - २

## (एषः, सः, एषा, सा ....)

सुरेशः - हरिः ओम्! नमस्कारः। मम नाम सुरेशः। अहं नूतनः छात्रः। अद्य एव पाठशालां प्रविशामि। भवतः नाम किम्?

रविः - मम नाम हरिः। अहम् अत्र एव पठामि। इतःपूर्वं भवान् कुत्र अपठत्(पठितवान्)?

सुरेशः - अहं गायत्रीसंस्कृतपाठशालायां पञ्चमकक्ष्याम् अपठम्। एते के ?

रविः - क्षम्यताम्। परिचयं कर्तुं विस्मृतवान्। एते अस्माकं स्नेहिताः। एषः गोपालः, एषः रमणः, एषः नारायणः, एषः शिवरामः। एषा सरला, एषा लता, एषा गौरी, अस्माकं गणिताध्यापिकायाः पुत्री।

सुरेशः - सः कः?

रविः - सः गिरीशः, अस्माकं छात्रनायकः। सः दशमकक्ष्यायां पठति।

सुरेशः - सा का?

रविः - सा प्रतिमा। अस्माकं संस्कृताध्यापकस्य पुत्री। अद्य तस्याः जन्मदिनम्।

सुरेशः - ते के? किमर्थं योगाभ्यासं कुर्वन्ति?

रविः - ते नवमकक्ष्याछात्राः। पाठशालासमयात् पूर्वं तेषां योगाभ्यासस्य कक्ष्या प्रचलति।

सुरेशः - अस्यां पाठशालायां योगाभ्यासकक्ष्या अपि प्रचलति वा?

रविः - न केवलं योगाभ्यासः, चित्रलेखनकक्ष्या हस्तकलाकक्ष्या च प्रचलन्ति।

सुरेशः - तत् किम्?

रविः - तत् क्रीडाङ्गणम्। अत्र एव वयं क्रीडामः।

सुरेशः - एवं खलु। अत्र अध्ययनं मम आनन्ददायकम्।

रविः - भवतु, घण्टावादनम् अभवत्। शीघ्रम् आगच्छ। अध्यापकस्य आगमनात् पूर्वमेव कक्ष्यां प्रविशावः।

SCERT TELANGANA

# सम्भाषणाभ्यासः - ३

## (मम दिनचर्या)

मम नाम दिनेशः। अहं प्रातःकाले षड्वादने उत्तिष्ठामि।

अनन्तरं दन्तधावनं मुखप्रक्षालनं च करोमि। क्षीरं पिबामि। सप्तवादने स्नानं करोमि। अनन्तरं पाठं पठामि। अष्टवादने अल्पाहारं स्वीकरोमि। नववादने विद्यालयं गच्छामि।

तत्र पाठान् शृणोमि। मध्याह्ने सार्धद्वादशवादने भोजनं करोमि।

सायङ्काले सार्धचतुर्वादने पाठशालातः गृहम् आगच्छामि। पादोनपञ्चवादने क्रीडाङ्गणे क्रीडामि। षड्वादनतः सार्धसप्तवादनपर्यन्तं पाठान् पठामि गृहपाठं च लिखामि।

अष्टवादने दूरदर्शनं पश्यामि। सार्ध-अष्टवादने भोजनं करोमि। सपादनववादने शयनं करोमि।

# गीतम् - २

## विचरसि वायो कुत्र?



सर् सर् सर् सर्
सर् सर् सर् सर्
विचरसि वायो कुत्र?
मामपि नय भोस्तत्र
मामपि नय भोस्तत्र

ग्रामे नगरे भुवि वा गगने
अविशेषा तव गतिः।
दीने धनिके कुजने सुजने
भेदविरहिता मतिः ॥ १॥

सुरभितकुसुमं कलुषितपङ्कं
समभावनया स्पृशसि।
कुमुदामोदं दूषितधूमम्
अविकलमनसा वहसि ॥ २॥

धृतभाराणां कृतकार्याणां
तनुतापं त्वं हरसि।
कन्दुकक्षेपणकेलिरतानां
श्रममनुपदमपनयसि ॥ ३॥

- डा. विश्वासः

SCERT TELANGANA

# सम्भाषणाभ्यासः - ४

## (सप्तमी विभक्तिः)

अध्यापकः - भोः छात्राः! अद्य भवद्भ्यः एकां वाक्यरचनस्पर्धां निर्वहामि। कानिचन पदानि ददामि। तेषां पदानाम् अर्थम् अनुसृत्य तानि समुचितस्थाने स्थापयित्वा वाक्यरूपेण वदन्तु।

१. पुस्तकम् २. जनाः ३. धनम्

इदानीं पुस्तकस्य स्थानमुद्दिश्य अहम् एकं वाक्यं वदामि।

''स्यूते पुस्तकम् अस्ति।'' , विनोदे! अन्यत् वाक्यं वदतु।

विनोदा - आपणे पुस्तकम् अस्ति।

नलिनी - अहमपि वदामि। पुस्तकं हस्ते अस्ति।

नारायणः - गृहे पुस्तकम् अस्ति।

प्रसादः - पुस्तकालये पुस्तकम् अस्ति।

अध्यापकः - सुन्दरवाक्यानि वदन्ति। इदानीं ''जनाः'' इति पदं स्वीकृत्य वाक्यानि वदन्तु। एकं वाक्यम् अहं वदामि। ''मार्गेषु जनाः सन्ति।''

भरतः - ग्रामेषु जनाः सन्ति।

प्रदीपः - नगरेषु जनाः सन्ति।

मधुरिमा - राज्येषु जनाः सन्ति।

कुसुमा - चित्रमन्दिरेषु जनाः सन्ति।

मनोज्ञा - आपणेषु जनाः सन्ति।

अध्यापकः - उत्तमम्। इदानीं ''धनम्'' इति पदं स्वीकृत्य वाक्यानि वदन्तु।

वासुकिः - हस्ते धनम् अस्ति।

सतीशः - कोशे धनम् अस्ति।

रत्नावली - कपाटिकायां धनम् अस्ति।

गिरीशः - पेटिकायां धनम् अस्ति।

भुवना - आधानिकायां धनम् अस्ति।

पवनः - वित्तकोशेषु धनम् अस्ति।

अध्यापकः - उत्तमम् उत्तमम्।



SCERT TELANGANA

# सम्भाषणाभ्यासः - ५
## (लिङ्गज्ञापनम् )

शिक्षकः - बालाः ! अहम् एकैकं वस्तु प्रदर्शयन् पदानि उच्चारयामि। भवन्तः सर्वे प्रत्युच्चारयन्तु।

- शिलाखण्डः, सुधाखण्डः, दण्डदीपः, पिञ्जः, करदीपः,
- अत्र सर्वत्र विसर्गः अन्ते श्रूयते। ततः पूर्वम् अकारः श्रूयते। अतः एते शब्दाः अकारान्तपुंलिङ्गशब्दाः।
- एवमन्यान् शब्दान् भवन्तः ऊहित्वा वदन्तु।

छात्राः - ग्रन्थः, वृक्षः .... इत्यादयः।

शिक्षकः - इदानीम् आकारान्तस्त्रीलिङ्गपदानि वदामि। अनुवदन्तु।

- गायिका, उत्पीठिका, लेखिका, पेटिका, पत्रिका अत्र अन्ते आकारः श्रूयते । एवम् ईकारान्तशब्दान् ऊहित्वा वदन्तु।

छात्राः - लेखनी, अङ्कनी, कूपी, कर्तरी, मयूरी, पुनःपूरणी।

शिक्षकः - साधु साधु। एवं 'म्' कारः अन्ते भवति चेत् नपुंसकलिङ्गः इति सामान्यनियमः।

- द्वारम्, वातायनम् इत्यादीनि। भवन्तः अन्यानि पदानि वदन्तु।

छात्राः - पुस्तकम्, सङ्गणकम्, आसनम्।

शिक्षकः - साधु साधु।



SCERT TELANGANA

प्रथमभागः

## प्रथमः पाठः

# १. सरला संस्कृतभाषा

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।







SCERT TELANGANA

१. चित्रे बालाः किं किं कुर्वन्ति?
२. नित्यजीवने केषु सन्दर्भेषु संस्कृतं शृण्वन्ति?
३. प्रतिदिनं कानिचन संस्कृतपदानि नित्यजीवने वदामः। तानि कानि?(स्नानं, पूजा इत्यादीनि)

**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**




सुरससुबोधा विश्वमनोज्ञा
ललिता हृद्या रमणीया
अमृतवाणी संस्कृतभाषा
नैव क्लिष्टा न च कठिना।।

।।नैव क्लिष्टा।।

कविकोकिल-वाल्मीकि-विरचिता
रामायण-रमणीयकथा
अतीवसरला मधुरमञ्जुला
नैव क्लिष्टा न च कठिना।।

।।नैव क्लिष्टा।।



व्यासविरचिता गणेशलिखिता
महाभारते पुण्यकथा
कौरव-पाण्डवसङ्गरमथिता
नैव क्लिष्टा न च कठिना।।

।।नैव क्लिष्टा।।



SCERT TELANGANA

कुरुक्षेत्र-समराङ्गण-गीता
विश्ववन्दिता भगवद्गीता
अमृतमधुरा कर्मदीपिका
नैव क्लिष्टा न च कठिना।।

।।नैव क्लिष्टा।।

कविकुलगुरु-नवरसोन्मेषजा
ऋतु-रघु-कुमारकविता
विक्रम-शाकुन्तल-मालविका
नैव क्लिष्टा न च कठिना।।

।।नैव क्लिष्टा।।



- श्री वसन्तगाड्गीलः




SCERT TELANGANA



# एतानि कुर्वन्तु



## १. श्रृण्वन्तु, विचिन्त्य वदन्तु



अ. गीतं श्रृण्वन्तु, रागयुक्तं गायन्तु।

आ. पाठ्यांशचित्रे के के सन्ति, ते किं किं कुर्वन्ति?

इ. चित्रं कां भाषाम् उद्दिश्य चित्रितम्?

ई. अस्मिन् गीते काः कथाः सन्ति? ताः कथाः भवन्तः जानन्ति वा।

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. गीतस्य भावं पठन्तु, अवगच्छन्तु।

- సులభంగా బోధపడునది, అందరికీ ఆనందాన్ని కలిగించేది, లలితమైనది, హృదయాన్ని సంతోషపెట్టేది రమణీయమైనది, అమృతభాషయు అయిన సంస్కృతభాష (నేర్చుకోవటానికి) కష్టమూ కాదు, కఠినమూ కాదు.
- కవికోకిలగా కీర్తిని పొందిన వాల్మీకిచే సంస్కృతంలో రచింపబడిన రమణీయమైన కథ రామాయణం. మిక్కిలి సరళమైనది, మధురమైనది, అందమైనదీ అయిన ఈ కథ కష్టమూ కాదు, కఠినమూ కాదు.
- వ్యాసునిచే రచింపబడి, గణపతిచే రాయబడిన పుణ్యకథ మహాభారతం. దీనిలో కౌరవపాండవుల యుద్ధవిషయం చెప్పబడింది. అట్టి పుణ్యకథ కష్టమూ కాదు. కఠినమూ కాదు.
- కురుక్షేత్రయుద్ధభూమిలో చెప్పబడినది, అందరికీ పూజనీయమైనది భగవద్గీత. అమృతం వలె మధురమైనదీ, కర్తవ్యాన్ని బోధించేదీ అయిన ఈ భగవద్గీత కష్టమూ కాదు. కఠినమూ కాదు.
- కవికులగురువైన కాళిదాసు నవరసాలను మేళవించి రాసిన ఋతుసంహారం, రఘువంశం, కుమారసంభవం మొదలయిన కావ్యాలు. విక్రమోర్వశీయం, శాకుంతలం, మాళవికాగ్నిమిత్రం, మొదలయిన నాటకాలు (చదవడానికి) కష్టమూ కావు. కఠినమూ కావు.

आ. अधः दत्तानि पदानि पठन्तु। गीते अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् अवगच्छन्तु।

| | | | | |
|---|---|---|---|---|
| हृद्या | क्लिष्टा | मञ्जुला | विरचिता | सुरससुबोधा |
| विश्ववन्दिता | ललिता | विश्वमनोज्ञा | अमृतवाणी | कर्मदीपिका |

SCERT TELANGANA

इ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकवाक्यानि पाठे अन्विष्य अत्र लिखन्तु।

१. కవికోకిలగా కీర్తినొందిన వాల్మీకి ........................................

२. అమృతభాష అయిన సంస్కృతభాష........................................

३. కష్టమూ కాదు, కఠినమూ కాదు ........................................

४. అందరికీ పూజనీయమైన భగవద్గీత ........................................

ई. पाठेऽस्मिन् आकारान्तस्त्रीलिङ्गपदानि सन्ति। तानि अन्विष्य लिखन्तु।

| | | |
|---|---|---|
| ..................... | ..................... | ..................... |
| ..................... | ..................... | ..................... |
| ..................... | ..................... | ..................... |

उ. पदरचनाक्रमं दृष्ट्वा अन्यपदरचनाक्रमं जानन्तु, लिखन्तु।

१. सुरससुबोधा -

| सु | र | स | सु | बो | धा |
|---|---|---|---|---|---|
| (स्+उ) + | (र्+अ) + | (स्+अ) + | (स्+उ) + | (ब्+ओ) + | (ध्+आ) |

२. ललिता ३. हृद्या ४. रमणीया ५. अमृतवाणी ६. रामायणम्

ऊ. मेलयित्वा लिखन्तु

| क | ख |
|---|---|
| १. सुरससुबोधा विश्वमनोज्ञा | अ. रामायणरमणीयकथा |
| २. कुरुक्षेत्रसमराङ्गणगीता | आ. महाभारते पुण्यकथा |
| ३. कविकुलगुरुनवरसोन्मेषजा | इ. विश्ववन्दिता भगवद्गीता |
| ४. व्यासविरचिता गणेशलिखिता | ई. ऋतुरघुकुमारकविता |
| ५. कविकोकिलवाल्मीकिविरचिता | उ. ललिता हृद्या रमणीया |

उदा - **१. सुरससुबोधा विश्वमनोज्ञा ललिता हृद्या रमणीया**

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. गीतानुसारं संस्कृतभाषा कीदृशी?

२. वाल्मीकिमहाकविना किं रचितम्?

३. महाभारतं केन रचितम्?

४. कर्मदीपिका इति पदं कस्याः विशेषणम्?

५. कालिदासेन रचितानि पुस्तकानि कानि?

SCERT TELANGANA



### आ. चिन्तयन्तु, लिखन्तु

१. भवान् संस्कृतभाषां जानाति चेत् किं किं पठितुं शक्नोति?

२. नित्यजीवने संस्कृतं कुत्र कुत्र पश्यामः?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः दत्तानां पदानाम् आधारेण संस्कृतवैशिष्ट्यम् उद्दिश्य वाक्यानि लिखन्तु।

उदा - **संस्कृते वेदाः सन्ति।**




### आ. अधः दत्तेषु वाक्येषु 'सङ्गरः' इति पदस्य समानार्थकपदानि सन्ति। तानि चित्वा अधः लिखन्तु।

१. कौरवपाण्डवानां सङ्ग्रामः अभवत्।

२. रामरावणयोः युद्धम् अभवत्।

३. रणे शिवाजी विजयं प्राप्तवान्।

सङ्गरः - .................... .................... ....................

### इ. 'कथा' इति पदम् उपयुज्य पदानि लिखन्तु।

उदा - पुण्यकथा .................... ....................

.......कथा .................... ....................

## ५. व्याकरणांशाः



### अ. उदाहरणानुसारं पदसंयोजनं कुर्वन्तु।

| | |
|---|---|
| १. समर+अङ्गणम् = **समराङ्गणम्** | २. अति+इन्द्रियम्= **अतीन्द्रियम्** |
| धन+आगारः = ........... | धरणी+इयम् = ............. |
| विद्या+आलयः = ........... | कवि+ईश्वरः = ............. |
| मधुर+अमृतम् = ........... | मुनि+इन्द्रः = ............. |

SCERT TELANGANA

३. गण+ईशः = **गणेशः** ४. गङ्गा+उदकम् = **गङ्गोदकम्**

राम+ईश्वरम् = ........... श्लोक+उच्चारणम् = ............

## आ. चित्रं पश्यन्तु, वाक्यानि पठन्तु।




एषः ग्रन्थालयः। एते ग्रन्थाः।

एषा उत्पीठिका। एताः पत्रिकाः।

एतत् सूचनाफलकम्। एतानि व्यजनानि।

☞ उपरितनवाक्येषु रेखाङ्कितानि पदानि प्रथमाविभक्तौ प्रयुक्तानि।

**चित्रम् उदाहरणानि च दृष्ट्वा कोष्ठकस्थपदानि उचितशब्दैः परिवर्त्य रिक्तस्थानानि पूरयन्तु।**

एषः ग्रन्थालयः। तत्र कपाटिकायां ............... (पुस्तकम्) सन्ति। रामायणमहाभारतादि .................... (ग्रन्थः) सन्ति। ग्रन्थालये .................... (सूचनाफलकम्) अस्ति। तत्र बहु ................. (सूचना) सन्ति। भित्तौ ................................. (भित्तिपत्रम्) सन्ति। भित्तिपत्रे संस्कृत ..............................(श्लोकः) सन्ति। उत्पीठिकायां संस्कृत ....................... (वार्तापत्रिका) ........................ (दिनपत्रिका) ....................(मासपत्रिका) ..................... (कथापुस्तकम्) च सन्ति। ग्रन्थालये ................... (व्यजनम्) सन्ति .................... (दण्डदीपः) अपि सन्ति।

## इ. चित्रे किं किम् अस्ति, किं किं नास्ति इति विचिन्त्य लिखन्तु।

उदा. अत्र................ अस्ति । अत्र ................... नास्ति



## ई. अधः दत्तानि पदानि पठन्तु । एतानि प्रथमाविभक्तेः रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **पुंलिङ्गे** | वीरः | वीरौ | वीराः |
| | बालकः | बालकौ | बालकाः |
| | मयूरः | मयूरौ | मयूराः |
| | वृक्षः | वृक्षौ | वृक्षाः |
| **स्त्रीलिङ्गे** | बालिका | बालिके | बालिकाः |
| | तुला | तुले | तुलाः |
| | पत्रिका | पत्रिके | पत्रिकाः |
| | माला | माले | मालाः |
| **नपुंसकलिङ्गे** | जलम् | जले | जलानि |
| | पुस्तकम् | पुस्तके | पुस्तकानि |
| | फलम् | फले | फलानि |
| | कन्दुकम् | कन्दुके | कन्दुकानि |

SCERT TELANGANA

उ. अधः दत्तानि विभिन्नधातूनां वर्तमानकालस्य प्रथमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| वर्तमानकाले- | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषे | भवति | भवतः | भवन्ति |
| | पठति | पठतः | पठन्ति |
| | लिखति | लिखतः | लिखन्ति |
| | नयति | नयतः | नयन्ति |
| | गच्छति | गच्छतः | गच्छन्ति |
| | यच्छति | यच्छतः | यच्छन्ति |
| | खादति | खादतः | खादन्ति |
| | पिबति | पिबतः | पिबन्ति |
| | करोति | कुरुतः | कुर्वन्ति |
| | अस्ति | स्तः | सन्ति |

ऊ. अधः दत्तानि वाक्यानि पठन्तु, अवगच्छन्तु।

| पुंलिङ्गे | एकवचनम् | बहुवचनम् |
|---|---|---|
| | एषः बालकः | एते बालकाः |
| | एषः मयूरः | एते मयूराः |
| | सः बालकः | ते बालकाः |
| | सः मयूरः | ते मयूराः |

| स्त्रीलिङ्गे | एकवचनम् | बहुवचनम् |
|---|---|---|
| | एषा बालिका | एताः बालिकाः |
| | एषा पेटिका | एताः पेटिकाः |
| | सा बालिका | ताः बालिकाः |
| | सा पेटिका | ताः पेटिकाः |

| नपुंसकलिङ्गे | एकवचनम् | बहुवचनम् |
|---|---|---|
| | एतत् पुस्तकम् | एतानि पुस्तकानि |
| | एतत् फलम् | एतानि फलानि |
| | तत् पुस्तकम् | तानि पुस्तकानि |
| | तत् फलम् | तानि फलानि |

SCERT TELANGANA

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. गीते चत्वारि चरणानि सन्ति। तेषु एकस्य चरणस्य भावं सम्भाषणरूपेण रचयन्तु।

आ. गीतभावस्य आधारेण संस्कृतभाषा सरला इति एकं विवरणात्मकं लेखं मातृभाषया मित्रं प्रति लिखन्तु।

## ७. परियोजनाकार्यम्



संस्कृते अनेकानि गीतानि सन्ति। तेषु कानिचन गीतानि संगृह्य भित्तिपत्रिकायां लेपयन्तु गायन्तु च।

## ८. प्रशंसा



ऊर्मिला - कावेरि! गणितपुस्तकम् किमर्थं पठति?

कावेरी - पुस्तके संस्कृतपदानि सन्ति वा न वा इति परिशीलयामि।

ऊर्मिला - संस्कृतपदानि लब्धानि वा।

कावेरी - दशांशः, त्रिभुजं, चतुरस्रं, दीर्घचतुरस्रं, सङ्कलनं, भागहारः, गुणकारः इत्यादीनि संस्कृतपदानि लब्धानि।

ऊर्मिला - उत्तमम्। एवं वयं एतत् संस्कृतपदमिति अज्ञात्वा एव पठामः। अतः सर्वत्र संस्कृतमेव अस्ति। संस्कृतभाषा अतीव सरला। नैव क्लिष्टा न च कठिना।

(उपाध्यायः - बालाः! एतेन वार्तालापेन भवन्तः/भवत्यः संस्कृतविषये किं चिन्तयन्ति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. अहं गीतं रागयुक्तं गातुं शक्नोमि । | | | |
| २. गीतस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| ३. संस्कृतभाषामधिकृत्य पञ्चवाक्यानि लेखितुं शक्नोमि। | | | |
| ४. गीतचरणस्य भावं सम्भाषणरूपेण रचयितुं शक्नोमि । | | | |

SCERT TELANGANA

प्रथमभागः

द्वितीयः पाठः

# २. बुद्धिरेव गरीयसी

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. एतस्य चित्रस्य कथां वदन्तु।
२. शशकः इव चतुराः जन्तवः के के सन्ति?
३. शक्तिः, युक्तिः - एतयोः का आवश्यकी? किमर्थम्?

## पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

(कस्मिंश्चित् अरण्ये केचन गजाः निवसन्ति स्म। तत्र कदाचित् वृष्टिकाले वृष्टेः अभावतः ते तृषया पीडिताः। अतः ते स्वस्वामिनः महागजस्य समीपं गत्वा एवम् अवदन्।)

गजाः - हे गजराज! अस्माकं जीवनाय कः उपायः? अस्मिन् अरण्ये वृष्टेः अभावात् अल्पजन्तूनां निमज्जनाय जलाशयः कोऽपि नास्ति। किमुत अस्माकं निमज्जनाय? अतः हे महागज! निमज्जनस्थानस्य अभावात् जीवन्तः अपि मृताः इव स्मः। किं कुर्मः?

(ततः गजानां वचांसि श्रुत्वा गजराजः किञ्चिद् दूरं गत्वा स्वच्छमेकं सरोवरं तान् दर्शयन् अवदत्।)

गजराजः - हे सुहृदः! निमज्जनयोग्यः सुन्दरः निर्मलश्च सरोवरः अत्रैव वर्तते। इदानीम् आरभ्य भवतां पिपासापूर्तिः भवतु। (इति उक्त्वा गजराजः गजान् सरोवरं दर्शयित्वा ततः निर्गतः।)

(ततः आरभ्य गजाः सर्वेऽपि जलपानार्थं स्नानार्थं च तं सरोवरं गच्छन्ति स्म। गजानां पादहतिभिः सरोवरसमीपे तृणादिकं सर्वं नष्टम् अभवत्। शशकाः स्वाहारस्य तृणादिकस्य नाशेन नितरां कृशाः दुःखिताः च अभवन्। ततः शशकराजः शिलीमुखः एवम् अवदत्।)



शिलीमुखः - पिपासापीडिताः एते गजाः प्रत्यहम् एतं सरोवरम् आगच्छन्ति। एतेषां गजानां पादहतिभिः अस्माकम् आहारः प्रतिदिनं नश्यति। इतःपरमपि एवमेव भवति चेत् आहारस्य अभावेन अस्माकं कुलम् अवश्यं विनश्यति। अतः एतां समस्यां परिहर्तुं कोऽपि उपायः चिन्तनीयः एव।

(ततः तत्रैव अन्यः कश्चित् विजयः नाम वृद्धशशकः तं शिलीमुखम् अवदत्। ''दैन्यं मास्तु। अहम् अवश्यं कञ्चन प्रतीकारं करिष्यामि''। (इति प्रतिज्ञां कृत्वा सः वृद्धशशकः ततः निर्गतः। गच्छन्नेव सः एवं चिन्तितवान्।)

विजयः - गजसमूहसमीपे स्थित्वा कथं वक्तव्यम्? यतः -

श्लो।। स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः।।

अतः अहं पर्वतशिखरम् आरुह्य गजराजेन स्नेहं करोमि। (इति विचिन्त्य पर्वतम् आरूढवान्।) (तं वृद्धशशकं दृष्ट्वा गजराजः पृच्छति।)

गजराजः - भवान् कः? कुतः आगतः?

विजयः - शशकोऽहम्। भगवान् चन्द्रः मां भवतः समीपं प्रेषितवान्।





गजराजः - वदतु, मत्तः किम् इच्छति भगवान् चन्द्रः।

विजयः - चन्द्रः भवन्तं सरोवरनिकटम् आहूतवान्। (इति गजराजं सरोवरनिकटं नयति।) तदिदं चन्द्राज्ञया वदामि। शृणोतु, ''चन्द्रसरोवररक्षकाणाम् एतेषां शशकानाम् आहारः भवता नाशितः। एतत् अनुचितम्। तान् शशकान् अहं बहुकालतः रक्षामि। अत एव मम शशाङ्कः इति प्रसिद्धिः। भवान् एतं सरोवरं त्यक्त्वा सर्वैः गजैः सह दूरं न गमिष्यति चेत् भवतः सर्वमपि गजकुलं नाशयिष्यामि।'' इत्युक्त्वा कोपात् कम्पमानं भगवन्तं शशाङ्कं सरोवरे दर्शितवान्।

**(एतत् वचनं श्रुत्वा, जले कम्पमानं भगवन्तं चन्द्रं च दृष्ट्वा गजराजः भयकम्पितः सन् अवदत्।)**

गजराजः - क्षम्यतां क्षम्यताम्। इदम् अज्ञानतः अभवत्। भविष्ये एवं कदापि न भविष्यति।

(ततः शशकः रात्रौ जले चञ्चलं चन्द्रबिम्बं गजराजं दर्शयन् तत्र पुनः न आगन्तुं प्रमाणं कारितवान्।)

विजयः - हे चन्द्रदेव! भवतः विषये अज्ञानात् अनेन अपराधः कृतः। एषः पुनः एतादृशम् अपराधं न करिष्यति। एतं सरोवरं पुनः नागमिष्यत्येव।

ततः गजराजः सर्वैः गजैः सह तं सरोवरं परित्यज्य दूरं गतवान्। शशकाः निर्भीताः सन्तः तस्य सरोवरस्य तीरे सुखेन अवसन्। अतः एव उच्यते - ''उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।''

SCERT TELANGANA



# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



१. चित्रे किं किम् अस्ति?
२. सम्भाषणं केषां मध्ये प्रवर्तते?
३. पाठे बुद्धिमान् कः अस्ति? किमर्थम्?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. पाठे कठिनपदानि चित्वा '⬭' इति चिह्नेन चिह्नीकुर्वन्तु। पदकोशस्य/अध्यापकस्य साहाय्येन अर्थान् जानन्तु।

आ. पाठं पठित्वा अधः दत्तानां प्रश्नानां समुचितसमाधानस्य चयनं कुर्वन्तु।

१) शशकानाम् आहारः कः?
अ) मांसः आ) पुष्पाणि इ) जलम् ई) तृणम् ( )

२) शशकं गजस्य समीपं कः प्रेषितवान्?
अ) इन्द्रः आ) चन्द्रः इ) सूर्यः ई) महाराजः ( )

३) चन्द्रस्य शशाङ्कः इति नाम कथम् अभवत्?
अ) शशकरक्षणेन आ) शशकभक्षणेन ( )
इ) शशकहरणेन ई) शशकतृणस्य खादनेन

४) जले कीदृशः चन्द्रः दृष्टः?
अ) गर्वितः चन्द्रः आ) हसितः चन्द्रः ( )
इ) कुपितः चन्द्रः ई) धावितः चन्द्रः

इ. अधः दत्तानि वाक्यानि पठन्तु। तानि वाक्यानि कोष्ठकस्थितेषु केन उक्तानि इति ज्ञात्वा लिखन्तु।

(शिलीमुखः,गजाः, गजराजः, विजयः, शशाङ्कः)

अ) अस्माकं जीवनाय कः उपायः?
आ) निमज्जनयोग्यः सुन्दरः सरोवरः अत्रैव वर्तते।
इ) अहम् अवश्यं कञ्चन प्रतीकारं करिष्यामि।
ई) शशाङ्कः मां प्रेषितवान्।
उ) अज्ञानेन अनेन अपराधः कृतः।
ऊ) इदम् अज्ञानेन अभवत्।
ऋ) एतां समस्यां 'परिहर्तुं' कोऽपि उपायः चिन्तनीयः।

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

अ) गजाः गजराजं किमवदन्?
आ) गजानां समस्या का?
इ) शशकराजस्य नाम किम्?
ई) वृद्धशशकस्य नाम किम्?
उ) विजयः चन्द्राज्ञां किमिति वदति?
ऊ) पाठेऽस्मिन् सम्बोधनात्मकपदानि सन्ति। तानि एकत्र लिखन्तु।



### आ. चिन्तयन्तु, लिखन्तु

अ) गजराजस्य भयस्य कारणं किम्?
आ) विजयस्य उपायः कः?
इ) गजानां समस्यां गजराजः कथं निवारितवान्?
ई) उपायेन किं किं शक्यम्? अन्यदेकमुदाहरणं लिखन्तु ।
उ) शशकः इव अन्योपायं चिन्तयित्वा कथां मातृभाषया पुनर्लिखन्तु।

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### १. गजस्य तुलनाम् अन्यवस्तुभिः कृत्वा उदाहरणानुगुणम् वाक्यानि लिखन्तु।



शूर्पः  उदा- गजस्य कर्णौ शूर्पाकारौ स्तः।

 स्तम्भः .........................................

कदली  .........................................

 भाण्डम् .........................................

सर्षपः  .........................................

 पर्वतः .........................................

SCERT TELANGANA

२. चित्राणि दृष्ट्वा सम्बद्धवाक्यानि लिखन्तु।



........................................



........................................



........................................



........................................

३. 'प्रतिदिनम्', 'अवश्यं' इत्येतौ शब्दौ उपयुज्य पञ्चवाक्यानि लिखन्तु।

**उदा : अहं प्रतिदिनम् अवश्यं देवं नमामि।**

## ५. व्याकरणांशाः



१. अत्र कानिचन वाक्यानि दत्तानि। उदाहरणानुसारं सम्बोधनात्मकपदम् उपयुज्य तानि परिवर्तयन्तु।

उदा - गजराजः उपायं वदति।

हे गजराज! उपायं वदतु।

अ) गजः सरोवरं गच्छति। ................................

आ) शिलीमुखः विजयेन मिलति। ................................

इ) गजराजः सरोवरतः दूरं गच्छति। ................................

ई) चन्द्रदेवः मां क्षाम्यति। ................................

उ) शशकाः निर्भीताः भवन्ति। ................................

SCERT TELANGANA

ऊ. अधः दत्तानि पदानि पठन्तु । एतानि सम्बोधनप्रथमाविभक्तेः रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गे | हे शशक! | हे शशकौ! | हे शशकाः! |
| | हे गज! | हे गजौ! | हे गजाः! |
| | हे चन्द्र! | हे चन्द्रौ! | हे चन्द्राः! |
| स्त्रीलिङ्गे | हे बालिके! | हे बालिके! | हे बालिकाः! |
| | हे लते! | हे लते! | हे लताः! |
| | हे गायिके! | हे गायिके! | हे गायिकाः! |
| नपुंसकलिङ्गे | हे मित्र! | हे मित्रे! | हे मित्राणि! |
| | हे मुख! | हे मुखे! | हे मुखानि! |

३. अधः दत्तानि विभिन्नधातूनां भूतकालस्य प्रथमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| भूतकाले - | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषे | अभवत् | अभवताम् | अभवन् |
| | अवदत् | अवदताम् | अवदन् |
| | अपठत् | अपठताम् | अपठन् |
| | अलिखत् | अलिखताम् | अलिखन् |
| | अनयत् | अनयताम् | अनयन् |
| | अगच्छत् | अगच्छताम् | अगच्छन् |
| | अयच्छत् | अयच्छताम् | अयच्छन् |
| | अखादत् | अखादताम् | अखादन् |
| | अपिबत् | अपिबताम् | अपिबन् |
| | अकरोत् | अकुरुताम् | अकुर्वन् |
| | आसीत् | आस्ताम् | आसन् |

## ६. सर्जनात्मकव्यक्तीकरणम्



१. पाठ्यांशस्य कथां नाटकरूपेण प्रदर्शयन्तु।

२. जीवने किमपि कष्टम् भवति चेत् कथम् उपायेन कार्यं साधयितुं शक्यमिति वदन्तु।

SCERT TELANGANA

## ७. परियोजनाकार्यम्



१. ''उपायेन हि यच्छक्यं न तत् शक्यं पराक्रमैः'' इत्यनया शीर्षिकया बह्व्यः कथाः कथापुस्तिकासु लभ्यन्ते। तासु एकां कथां लिखित्वा आनयन्तु।

## ८. प्रशंसा



नागभूषणः - हे सखे! मधो! गतदिने क्रिकेट् स्पर्धां दृष्टवान् वा?

मधुः - आम्। दृष्टवान्। परन्तु अध्यापकैः दत्तान् लक्ष्यात्मकप्रश्नान् न पठितवान्। समयः नासीत्। भवान् पठितवान् वा।

नागभूषणः - आम्, पठितवान्।

मधुः - भवानपि स्पर्धां दृष्टवान् खलु! तर्हि पठनं कथं साध्यमभवत्?

नागभूषणः - तेषां खेलनसमये मध्ये मध्ये विज्ञापनानि आगतानि किल। अतः क्रीडां पश्यन् सप्ततिप्रश्नान् सम्पूर्णतया पठितवान्।

मधुः - समुचितः उपायः। भवान् मेधावी।

(मधुरिव भवानपि/भवत्यपि उपायशालिनं मित्रं कथम् अभिनन्दति।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १.पाठं धारालतया पठितुं शक्नोमि । | | | |
| २.पाठस्य सारांशं स्वीयवाक्यैः वक्तुं शक्नोमि । | | | |
| ३.उपायेन किं किं कर्तुं शक्यम् इति लेखितुं शक्नोमि । | | | |
| ४.पाठ्यांशस्य कथां नाटकरूपेण प्रदर्शयितुं शक्नोमि । | | | |

**विद्या योगेन रक्ष्यते**

SCERT TELANGANA

# गीतम्

## पुत्री मम खलु निद्राति



पुत्री मम खलु निद्राति
पुत्री मम खलु निद्राति।
सुन्दरशयने सुखमयवसने
पुत्री मम खलु निद्राति ॥

रे रे वायस! कर्कशकण्ठ!
मा रट मा रट कर्णकठोरम् ।
श्रान्ता क्लान्ता पुनरनुनीता
पुत्री मम खलु निद्राति ॥

म्याँव्, म्याँव् मा कुरु घोरविरावं
चल चल रे खल चोरबिडाल!
स्निग्धा मुग्धा सेवितदुग्धा
पुत्री मम खलु निद्राति ॥

उच्चैर्मा भष शुनक! वराक!
भौ भौ मा कुरु कार्यविहीन ।
विमला कुशला सुमनोमृदुला
पुत्री मम खलु निद्राति ॥

रे रे मशक! मा कुरु गानं
मा स्पृश मा दश रक्तपिपासो!
सुदती सुमुखी शोभनगात्री
पुत्री मम खलु निद्राति ॥

- डा. विश्वासः

द्वितीयभागः

तृतीयः पाठः

# ३. साहसबालकः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रं कं सन्दर्भं सूचयति?
२. चित्रे कः कार्यक्रमः प्रचलति।
३. चित्रे बालबालिकाः किमर्थं गजौ आरूढवन्तः?



## पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।



प्रेमनगरम् इति ग्रामः उत्तराखण्डराज्ये अस्ति। तस्मिन् जनपदे एकः केन्द्रीयविद्यालयः अस्ति। प्रियांशुजोशी इति एकः दशवर्षीयः बालकः, तस्य भगिनी च तस्मिन् विद्यालये पठतः।

सः २००९तमवर्षस्य जुलैमासस्य प्रथमदिनाङ्कः। मध्याह्ने विद्यालयस्य विरामः आसीत्। प्रियांशुः भगिन्या सह गृहं गच्छति स्म। मार्गे हठात् एकः चित्रकः आगच्छत्। अकस्मात् तस्य भगिन्याः उपरि आक्रमणम् अकरोत्। तेन बालिकायाः कण्ठे स्कन्धे च आघाताः अभवन्।

प्रियांशुः तूष्णीं न स्थितवान्, पुस्तकस्यूतेन चित्रकं ताडयितुम् आरब्धवान् च। चित्रकः तां बालिकाम् अत्यजत्। परन्तु प्रियांशोः उपरि आक्रमणम् अकरोत्। प्रियांशुः उच्चैः स्वरेण आक्रन्दनम् कृतवान्। मार्गस्थाः जनाः तस्य आक्रन्दान् श्रुत्वा वेगेन आगत्य चित्रकात् तौ बालौ रक्षितवन्तः।





भारतसर्वकारः प्रियांशोः धैर्यस्य प्रशंसाम् अकरोत्। भारतप्रधानमन्त्री, ''सञ्जयचोप्रा राष्ट्रियवीरतापुरस्कारेण'' प्रियांशुं पुरस्कृतवान्।

बालाः! पश्यन्तु, दशवर्षीयस्य बालस्य धैर्यम्! भारतसर्वकारः एवं धैर्यं, साहसं प्रदर्शितवतः बालान् सम्मानयति। तेषां विद्याभ्यासाय उत्तमसाहाय्यं च करोति।





राष्ट्रपतिना साकं २०१० तमवर्षस्य साहसबालपुरस्कारग्रहीतारः



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठ्यांशचित्रे कानि कानि सन्ति?

आ. प्रियांशोः साहसम् उद्दिश्य स्वीयवाक्यैः वदन्तु।

इ. प्रियांशुः केन कारणेन चित्रकं प्रतिघटितवान्?

ई. भवती/भवान् कदापि साहसं प्रदर्शितवती/प्रदर्शितवान् वा? कस्मिन् सन्दर्भे?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. पाठ्यचित्रे के के किं किं कुर्वन्ति?

आ. पाठे प्रियांशु-चित्रकशब्दौ कतिवारम् आगतौ?

इ. पाठे केषाञ्चनपदानाम् अन्ते 'ति' - 'वान्' - 'त्' इति अक्षराणि सन्ति। तादृशपदानि लिखन्तु। तेषाम् अर्थान् अवगच्छन्तु।

ई. पाठे एकम् अक्षरं सर्वत्र व्यतिरेकार्थं सूचयति। तत् अन्विष्य लिखन्तु। कस्य पदस्य अग्रे तत् भवति इति पश्यन्तु।

उ. अत्र कानिचन वाक्यानि सन्ति। तानि पठित्वा व्यतिरेकाक्षरम् उपयुज्य वाक्यानि व्यतिरेकभावेन लिखन्तु।

उदा : प्रियांशोः भगिनी चित्रकं दृष्ट्वा उच्चैः हसति।
प्रियांशोः भगिनी चित्रकं दृष्ट्वा उच्चैः **न** हसति।

१. प्रियांशुः चित्रकं दृष्ट्वा पलायनं कृतवान्।
२. प्रियांशुः दण्डेन चित्रकं ताडितवान्।
३. मार्गस्थजनाः चित्रकं मारयन्ति।

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. प्रियांशुः कस्मिन् राज्ये वसति?
२. सः कुत्र पठति?
३. प्रियांशुः चित्रकं कथं प्रतिघटितवान्।
४. साहसबालानां कृते कीदृशपुरस्कारः दीयते?



### आ. चिन्तयन्तु, लिखन्तु

१. प्रियांशोः साहसम् उद्दिश्य पञ्चवाक्यानि लिखन्तु?
२. साहसं केषु सन्दर्भेषु प्रदर्शनीयम्?
३. प्रियांशुः पुस्तकस्यूतेन चित्रकं ताडितवान्। चित्रकात् रक्षणं प्राप्तुम् अन्यम् उपायं सूचयन्तु।
४. प्रियांशुं प्रधानमन्त्री अभिनन्दति। यदि भवती/भवान् एव प्रधानमन्त्री भवति चेत् तस्यां सभायां प्रियांशोः साहसकार्यविषये किं वदति?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. 'कारः' इति पदस्य अग्रे कोष्ठकस्थान् उपसर्गान् संयोज्य पदानि रचयन्तु।

| आ, वि, प्रा, अधि, निरा, प्र, उप, अप |
|---|

उदा : आकारः




...................... ......................
...................... ......................
...................... ......................
......................

SCERT TELANGANA

आ. वाक्यानि पठन्तु, रेखाङ्कितपदानाम् अर्थं जानन्तु। वाक्यानां भावम् अवगच्छन्तु। वदन्तु।



१. माता ''भोजनं कुर्वन्तु'' इति वदति।
जनकः ''दूरदर्शनं (टी.वी.) मा पश्यन्तु'' इति आज्ञां करोति।

२. मम गृहे एकः आसन्दः अस्ति। तस्य उपरि पत्रसूची अस्ति।
मातुलः आगत्य तस्य उपरि उपविशति।

३. मार्गे फलविक्रेता ''आम्रफलानि, दाडिमफलानि, बदरीफलानि'' इति उच्चैः वदति।
गृहे बालः अपि ''आम्मपलानि, दाडिपलानि, बद्दनीफ्लानि'' इति उच्चैः अनुवदति।

## ५. व्याकरणांशाः



अ. अधः दत्तानि वाक्यानि पठन्तु। रेखाङ्कितपदानाम् अर्थान् अवगच्छन्तु।

१. उत्तराखण्डराज्ये प्रेमनगरम् इति ग्रामः अस्ति।
२. प्रियांशुः विद्यालये पठति।
३. विद्यालयस्य विरामः मध्याह्ने आसीत्।
४. एकः चित्रकः मार्गे आगतः।

☞ उपरितनवाक्येषु रेखाङ्कितानि पदानि सप्तमीविभक्तेः रूपाणि।

आ. उपरि दत्तानि रेखाङ्कितपदनि दृष्ट्वा अधस्थे आवरणे दत्तं पदं समीचीनार्थे परिवर्त्य लिखन्तु।

नवीनः रेल्यानम् आरूढवान्। रेल् (यानम्) ........................ बहवः जनाः सन्ति। नवीनस्य (हस्तः) ............................ स्यूतः अस्ति। तस्मिन् (स्यूतः) ........................... तस्य युतकम् अस्ति। तस्मिन् (युतकं) .................... धनम् अस्ति। नवीनः (मध्याह्नम्) ............................ निद्रितवान्। धनं नष्टम्।

इ. पदानि पठन्तु, अदृष्ट्वा लिखन्तु, समीक्षां कुर्वन्तु।

| | | | |
|---|---|---|---|
| दशवर्षीयः | गृहम् | आक्रमणम् | श्रुत्वा |
| दिनाङ्कः | भगिनी | पुरस्कारः | सर्वकारः |

ई. अधः दत्तानि वाक्यानि पठन्तु।

प्रियांशोः विद्यालयस्य विरामः आसीत्।
चित्रकः आक्रमणम् अकरोत्।
चित्रकः बालिकाम् अत्यजत्।

रेखाङ्कितानि एतानि पदानि भूतकालिकक्रियापदानि।

SCERT TELANGANA

उ. तथैव वर्तमान-भूत-भविष्यत्कालयोः क्रियापदानां वाक्यानि पठित्वा तेषां भेदान् जानन्तु।

| | | |
|---|---|---|
| सः चन्दमामां पठति। | सा भोजनं करोति। | रेल्यानं गच्छति। |
| सः चन्दमामाम् अपठत्। | सा भोजनम् अकरोत्। | रेल्यानम् अगच्छत्। |
| सः चन्दमामां मध्याह्ने पठिष्यति। | सा भोजनं सायङ्काले करिष्यति। | रेल्यानं गमिष्यति। |

ऊ. वाक्यानि पठन्तु। रेखाङ्कितपदानि परिशीलयन्तु।

राजेशः गृहे अस्ति। सः विद्यालयं न आगच्छति। सः रात्रौ ग्रामं गमिष्यति। तस्य सोदरी रेखा। सा बुद्धिमती। तस्याः द्विचक्रिका अस्ति। सा बहु पुरातनी। तस्याः एकं चक्रं नास्ति।

**नामवाचकस्य स्थाने यानि पदानि सन्ति, तानि सर्वनामानि। पाठतः सर्वनामानि चित्वा लिखन्तु।**

ऋ. अधः दत्तानि पदानि पठन्तु। एतानि सप्तमीविभक्तेः रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **पुंलिङ्गे** | राज्ये | राज्ययोः | राज्येषु |
| | जनपदे | जनपदयोः | जनपदेषु |
| | विद्यालये | विद्यालययोः | विद्यालयेषु |
| **स्त्रीलिङ्गे** | लतायां | लतयोः | लतासु |
| | तुलायां | तुलयोः | तुलासु |
| | गायिकायां | गायिकयोः | गायिकासु |
| **नपुंसकलिङ्गे** | फले | फलयोः | फलेषु |
| | भवने | भवनयोः | भवनेषु |
| | नगरे | नगरयोः | नगरेषु |

ॠ. अधः दत्तानि विभिन्नधातूनां भूतकाललकार-क्तवतुप्रत्ययान्तरूपाणि पठन्तु। रूपद्वयमपि भूतकालस्य अर्थं बोधयति । एतानि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| वर्तमानकाले | लकार रूपाणि भूतकाले | क्तवतुप्रत्ययान्तरूपाणि पुंलिङ्गे | स्त्रीलिङ्गे | |
|---|---|---|---|---|
| वदति | अवदत् | उक्तवान् | उक्तवती | (ए.व) |
| | अवदन् | उक्तवन्तः | उक्तवत्यः | (ब.व) |
| पठति | अपठत् | पठितवान् | पठितवती | (ए.व) |
| | अपठन् | पठितवन्तः | पठितवत्यः | (ब.व) |


SCERT TELANGANA

| | | | | |
|---|---|---|---|---|
| लिखति | अलिखत् | लिखितवान् | लिखितवती | (ए.व) |
| | अलिखन् | लिखितवन्तः | लिखितवत्यः | (ब.व) |
| नयति | अनयत् | नीतवान् | नीतवती | (ए.व) |
| | अनयन् | नीतवन्तः | नीतवत्यः | (ब.व) |

**एवम् अन्यक्रियापदानि अध्यापकस्य साहाय्येन अवगच्छन्तु।**

## ६. सर्जनात्मकव्यक्तीकरणम्



**पाठे वर्णितां साहसघटनां कथारूपेण लिखन्तु।**

## ७. परियोजनाकार्यम्



**अ. राष्ट्रपतिपुरस्कारग्रहीतॄणां साहसबालबालिकानां छायाचित्राणि सङ्कलयन्तु।**
**आ. तेषां साहसकार्याणि चित्रीकृत्य भित्तिपत्रिकायां लेपयन्तु।**

## ८. प्रशंसा



अध्यापकः - रमेश! कृष्ण! गोपाल! भवन्तः किमर्थं विलम्बेन कक्ष्याम् आगतवन्तः?

रमेशः - श्रीमन्? गोपालम् एकः भयङ्करः शुनकः अनुधावितवान्। एषः भीतः अभवत्। तस्मात् शुनकात् गोपालं रक्षित्वा वयम् आगतवन्तः। अतः आगमने विलम्बः अभवत्।

अध्यापकः - उत्तमं कार्यं कृतवन्तः।

(बालाः! एतादृशपरिस्थितौ भवन्तः किं कुर्वन्ति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. प्रियांशोः साहसम् उद्दिश्य वक्तुं शक्नोमि । | | | |
| ३. साहसं केषु सन्दर्भेषु प्रदर्शनीयम् इति लेखितुं शक्नोमि। | | | |
| ४. पाठे वर्णितां साहसघटनां कथारूपेण लेखितुं शक्नोमि । | | | |

SCERT TELANGANA

द्वितीयभागः

चतुर्थः पाठः

# ४. अग्निः वायुश्च

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे किं प्रचलति? जनाः किं किं कुर्वन्ति?

२. वायुः द्रष्टुं शक्यते वा? वायोः अस्तित्वं कथं जानीमः?

३. अग्निः वायुः इव जीवने अत्यावश्यकाः प्रकृत्यंशाः के ?



## पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।

आचार्यः - हे बालाः! श्वः दीपावलीपर्वदिनं खलु! विद्यालयाय विरामः दत्तः।

गोविन्दः - आर्य! एवं चेत् अहम् अद्य सायं जनकेन सह गत्वा बहु दीपावलिसामग्रीं क्रीणामि।

ललिता - अहं तु दीपान् ज्वालयामि।



आचार्यः - दीपावलीसामग्रीं क्रीणन्तु। दीपान् ज्वालयन्तु। एतत् सर्वम् अग्निसम्बद्धं भवति खलु! अतः अद्य अग्नेः नामानि स्मरामः।

**अग्निर्वैश्वानरो वह्निः वीतिहोत्रो धनञ्जयः।**
**कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्॥**

**बर्हिश्शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः।**
**आश्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः॥**

**लोहिताश्वो वायुसखश्शिखावानाशुशुक्षणिः।**
**हिरण्यरेता हुतभुक् दहनो हव्यवाहनः॥**
**सप्तार्चिर्दमुनाश्शुक्रः चित्रभानुर्विभावसुः॥**



पवनः - आचार्य! अग्निः पवनेन विना न ज्वलति खलु!



SCERT TELANGANA



आचार्यः - सत्यम्। अग्नेः वायुसखः इति नाम अपठन् किल! वायुं विना अग्निः न दहति। अतः वयं मित्रधर्मेण वायुनामानि अपि पठामः।

**श्वसनस्स्पर्शनो वायुः मातरिश्वा सदागतिः।**
**पृषदश्वो गन्धवहः गन्धवाहानिलाशुगाः।।**

**समीरमारुतमरुत् जगत्प्राणसमीरणाः।**
**नभस्वद्वातपवनपवमानप्रभञ्जनाः।।**



गोविन्दः - आचार्य! अग्नेः वायोः एतानि अनेकानि नामानि कथम् आगतानि?

आचार्यः - गान्धीमहोदयः किमुक्तवान् जानन्ति वा?

सर्वे - नैव। वदन्तु आचार्य!

आचार्यः - ''अहं पादरक्षाणां सीवनसमये चर्मकारः, वस्त्रक्षालनसमये रजकः, क्षुरकर्मसमये क्षुरकः भवामि'' इति।

तथैव अग्निः, वायुः, जलम्, आकाशः, भूमिः, सूर्यः इत्यादयः दैनन्दिनजीवने प्रतिपदं, प्रतिक्षणम् अनेकरूपैः अस्माकं साहाय्यं कुर्वन्ति। ते यदा यादृशं कार्यं कुर्वन्ति तदा तान् तादृशेन नाम्ना आह्वयामः।



सर्वे - धन्यवादाः आचार्य!

आचार्यः - शुभं भूयात्। दीपावल्याः शुभकामनाः।

SCERT TELANGANA



# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. धनञ्जयः इति कस्य नाम?

आ. कस्य नाम समीरः?

इ. अग्नेः वायोश्च नामानि वदन्तु ।

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। अदृष्ट्वा कति पदानि वक्तुं शक्नुवन्तीति परस्परं पृच्छन्तु।

| | | | | | |
|---|---|---|---|---|---|
| हुतभुक् | विभावसुः | हव्यवाहनः | दहनः | पावकः | अनलः |
| वह्निः | वैश्वानरः | अग्निः | कृशानुः | धनञ्जयः | सप्तार्चिः |
| वायुसखः | वायुः | सदागतिः | गन्धवाहः | मारुतः | अनिलः |
| मातरिश्वा | प्रभञ्जनः | पृषदश्वः | स्पर्शनः | पवनः | श्वसनः |

आ. अधः दत्तानि पदानि पठित्वा पाठे वर्तुलचिह्नेन अङ्कयन्तु। अग्निनामानि स्वपुस्तिकासु लिखन्तु।

| | | | | |
|---|---|---|---|---|
| वीतिहोत्रः | आशुगः | उषर्बुधः | मरुत् | नभस्वान् |
| आश्रयानः | हिरण्यरेताः | समीरः | शिखावान् | समीरणः |
| शुक्रः | गन्धवहः | शुष्मा | बर्हिः | |

इ. श्लोकस्थानि अग्निनामानि वायुनामानि च गणयित्वा तेषां सङ्ख्यां लिखन्तु।

ई. पाठेऽस्मिन् दत्तान् श्लोकान् पठन्तु। अधः दत्तेषु पदेषु दृष्टानि अग्निनामानि चिन्वन्तु।

| | | | |
|---|---|---|---|
| १) प्रभञ्जनः | २) पृषदश्वः | ३) बृहद्भानुः | ४) जगत्प्राणः |
| १) सदागतिः | २) आशुशुक्षणिः | ३) वातः | ४) मातरिश्वा |
| १) आशुगः | २) जातवेदाः | ३) अनिलः | ४) श्वसनः |

उ. अधः दत्तेषु पदेषु वायुनामानि चिन्वन्तु।

| | | | |
|---|---|---|---|
| १) दमुनाः | २) कृपीटयोनिः | ३) कृष्णवर्त्मा | ४) स्पर्शनः |
| १) शोचिष्केशः | २) अनिलः | ३) तनूनपात् | ४) चित्रभानुः |

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१) अग्निनामानि लिखन्तु।

२) वायुनामानि लिखन्तु।

३) गान्धीमहोदयः किम् उक्तवान्?



### आ. चिन्तयन्तु, लिखन्तु

१) वायोः प्रयोजनानि लिखन्तु?

२) अग्नेः प्रयोजनानि लिखन्तु?

३) चित्रे अग्निस्थानानि कानि सन्ति। तानि अतिरिच्य अग्निः कैः रूपैः कुत्र कुत्र वर्तते इति लिखन्तु।

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. कक्ष्यायाः सर्वे छात्राः समूहद्वये उपविशेयुः। प्रथमसमूहस्थः छात्रः वायुनाम वदेत्। द्वितीयसमूहस्थः अग्निनाम वदेत्। पुनः प्रथमसमूहस्थः वायुनाम वदेत्।**

अधः कोष्टकयुक्तं चित्रमेकं दत्तमस्ति। उपरिष्टात् दक्षिणपार्श्वे एकः भागः, वामपार्श्वे एकः भागः इत्येवं विभज्य एकः छात्रः उपरिष्टात् एकं पार्श्वं अन्यः छात्रः द्वितीयपार्श्वं चिनोतु। ततः प्रथमः वायुनाम लिखेत्, द्वितीयः अग्निनाम लिखेत्। एवम् एकैकं पार्श्वं पूरयन्तः अन्तिमकोशं प्रविशेयुः। यः प्रथमं कोष्टकान् पूरयति सः जयं प्राप्नोति।



SCERT TELANGANA

आ. गृहेषु प्रदर्शितानां नामफलकानाम् अनुसारं रेखया चित्राणि योजयन्तु। एका रेखा अन्यरेखां न स्पृशेत्।

शिक्षिका ▯

क्षुरकः ▯

चालकः ▯

कुम्भकारः ▯

वैद्यः ▯

स्वर्णकारः ▯

तन्तुवायः ▯

सैनिकः ▯



सैनिकः



क्षुरकः



अर्चकः



कुम्भकारः



गायिका



नर्तकी



आपणिकः



तन्तुवायः

SCERT TELANGANA

**कोष्टकस्थानि क्रियापदानि स्वीकृत्य के किं कुर्वन्ति इति लिखन्तु।**

| |
|---|
| निर्माति, वयति, नृत्यं करोति, अर्चति, चालयति, तनोति, वैद्यं करोति, नापयति, विलिखति, गायति वार्ताम् आनयति, सीव्यति, रक्षति, विक्रीणाति, रथयति, यच्छति । |



वार्ताहरः



शिक्षिका



लिपिकः



चालकः



वैद्यः



स्वर्णकारः



चित्रकारः



लोहकारः

लोहकारः ☐

अर्चकः ☐

गायिका ☐

चित्रकारः ☐

नर्तकी ☐

आपणिकः ☐

वार्ताहरः ☐

लिपिकः ☐

उदा - सैनिकः रक्षति। .................. .................. ..................

.................. .................. .................. ..................

.................. .................. .................. ..................

.................. .................. .................. ..................

SCERT TELANGANA

## ५. व्याकरणांशाः



### अ. अधः दत्तानि चित्राणि पश्यन्तु। वाक्यानि पठन्तु।


बालकः


चषकः


बालकः <u>चषकेण</u> पिबति।


आरक्षकः


दण्डः


आरक्षकः <u>दण्डेन</u> ताडयति।


अम्बा


छुरिका


अम्बा <u>छुरिकया</u> कर्तयति।


लता


नासिका


लता <u>नासिकया</u> जिघ्रति।


शिक्षिका


लेखनी


शिक्षिका <u>लेखन्या</u> लिखति।


गणेशः


वाहनम्


गणेशः <u>वाहनेन</u> गच्छति।


क्रीडाकारः


कन्दुकम्


क्रीडाकारः <u>कन्दुकेन</u> क्रीडति।

☞ **उपरितनवाक्येषु रेखाङ्कितानि पदानि तृतीयाविभक्तेः रूपाणि।**

### आ. उदाहरणानुसारं रिक्तस्थानेषु समुचितानि तृतीयाविभक्तिरूपाणि लिखन्तु।

उदा - मालाकारः **सूत्रेण** मालां रचयति। (सूत्रं)

कृषकः ............................ क्षेत्रं कर्षति। (हलः)

क्रीडाकारः .....................प्रहरति। (पादः)

आपणिकः ......................... तोलयति। (तुला)

चित्रकारः ............................ चित्रं लिखति। (कूर्ची)

सौचिकः ..................................कर्तयति। (कर्तरी)

अर्चकः ..................................देवम् अभिषिञ्चति। (जलं)

SCERT TELANGANA

ऋ. अधः दत्तानि पदानि पठन्तु। एतानि तृतीयाविभक्तेः रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गे | चषकेण | चषकाभ्यां | चषकैः |
| | चमसेन | चमसाभ्यां | चमसैः |
| | दण्डेन | दण्डाभ्यां | दण्डैः |
| | पादेन | पादाभ्यां | पादैः |
| स्त्रीलिङ्गे | छुरिकया | छुरिकाभ्यां | छुरिकाभिः |
| | नासिकया | नासिकाभ्यां | नासिकाभिः |
| | लेखन्या | लेखनीभ्यां | लेखनीभिः |
| नपुंसकलिङ्गे | वाहनेन | वाहनाभ्यां | वाहनैः |
| | कन्दुकेन | कन्दुकाभ्यां | कन्दुकैः |

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. चित्रं दृष्ट्वा वायुः, सूर्यः - एतयोः मध्ये कः बलवान् इति विषयस्य आधारेण "अहं बलवान्" इति शीर्षिकां दत्वा एकां कथां स्वीयभाषया लिखन्तु। तां नाटकरूपेण प्रदर्शयन्तु।



SCERT TELANGANA

## ७. परियोजनाकार्यम्



अ. वायोः अग्नेश्च विविधसामाजिकोपयोगीनि दृश्यचित्राणि सङ्कलय्य, भित्तिपत्रिकासु स्थापयन्तु।

आ. विविधवृत्तीनां कर्मकराणां च चित्राणि सङ्गृह्य आनयन्तु, भित्तिपत्रिकासु लेपयन्तु।

## ८. प्रशंसा



शङ्करः - मम नाम शङ्करः। अहमत्र नूतनः। तत्र पार्श्वे एव मम गृहम्। मम पुत्रीं विद्यालये प्रवेशयितुम् आनीतवान्। प्रवेशार्थं कियत् धनं आवश्यकम्।

राजेश्वरः - सर्वकारविद्यालयः खलु। धनम् अनावश्यकम्। परन्तु पाठशालायै किमपि कार्यं आवश्यकं चेत् वयं स्वयमेव कुर्मः।

शङ्करः - अस्मिन् विद्यालये विद्युत् नास्ति किम्?

राजेश्वरः - विद्युतः व्यवस्था अस्ति। परिकरेषु कोऽपि दोषः स्यात्।

शङ्करः - भवतु। तत्समीकरणमेव मम वृत्तिः। अत्र प्रधानफ्यूजमध्ये एका तन्त्री नष्टा भवेत्। इदानीं परिकरान् नानीतवान्। मध्याह्ने आगत्य समीकरोमि।

राजेश्वरः - भवान् उत्तमः। तथा करोति चेत् सर्वे छात्राः उपाध्यायाः च आनन्दम् अनुभवन्ति। समाजकार्यं खलु।

(भवान्/भवती अपि विद्यालयार्थं किं कर्तुं इच्छति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठस्थश्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. अग्नि-वायुनामानि वक्तुं शक्नोमि । | | | |
| ३. अग्नेः, वायोः प्रयोजनानि लेखितुं शक्नोमि । | | | |
| ४. चित्रं दृष्ट्वा कथां लेखितुं शक्नोमि । | | | |

**अक्रोधेन जयेत् क्रोधम्**

SCERT TELANGANA

द्वितीयभागः

पञ्चमः पाठः

# ५. श्रीरामवनप्रस्थानम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के के सन्ति?
२. ते कुत्र सन्ति? किमर्थम्?
३. सीता किं करोति?



**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

**१. ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथस्सुतम्।**
**प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया॥**

**२. यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः।**
**तस्याभिषेकसम्भारान् दृष्ट्वा भार्याथ कैकयी॥**

**३. पूर्वं दत्तवरा देवी वरमेनमयाचत।**
**विवासनं च रामस्य भरतस्याभिषेचनम्॥**

భావం – దశరథ మహారాజు ప్రజలకు హితం చేయాలనే కోరికతో సమస్తసద్గుణ సంపన్నుడూ, ఎల్లవేళలా ప్రజల హితాన్నే కోరేవాడూ, తనకు ప్రీతిపాత్రుడూ, మొదటికుమారుడునూ అయిన రాముణ్ణి యువరాజుగా చేయాలనుకున్నాడు. దశరథుని రాణులలో ఒక రాణి అయిన కైకేయి రామపట్టాభిషేకానికై సేకరించిన సామగ్రిని చూసి దశరథుడు పూర్వం తనకు రెండు వరాలిచ్చి ఉండుట వల్ల, వాటిలో ఒక వరంగా రాముణ్ణి అడవులకు పంపాలనీ, రెండవ వరంగా భరతునికి పట్టం కట్టాలనీ దశరథుని కోరింది.

**४. स सत्यवचनाच्चैव धर्मपाशेन संयतः।**
**विवासयामास सुतं रामं दशरथः प्रियम्॥**

భావం – సత్యవాక్యాన్ని పరిపాలించాలనే కారణంగా ఆ దశరథుడు, ధర్మపాశం చేత బంధింపబడి తన పుత్రుడైన రాముడిని, వనవాసానికి పంపాడు.

५. स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात्।।

భావం – అతి పరాక్రమశాలియైన రాముడు కైకేయికి సంతోషం కలిగించడానికి, తండ్రి మాటమాత్రంగా చెప్పినంతనే దానిని ఆజ్ఞగా గ్రహించి, తన ప్రతిజ్ఞను నిలుపుకొంటూ అరణ్యానికి వెళ్ళాడు.



६. तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः।।

భావం – లక్ష్మణుడు రాముడికి చాలా ఇష్టమైన తమ్ముడు. రామునిపట్ల సహజమైన ప్రేమ గలవాడు. వినయ సంపన్నుడు. అందువల్ల అరణ్యానికి వెళుతున్న ఆ రాముని వెంట వెళ్ళాడు. ఈ విధమైన ఉత్తమకార్యం చేయడంవల్ల తన తల్లి సుమిత్రకు కూడా ఆనందాన్ని కలిగించాడు.

७. रामस्य दयिता भार्या नित्यं प्राणसमाहिता।
सीताप्यनुगता रामं शशिनं रोहिणी यथा।।



భావం – రాముడికి ఇష్టురాలూ, భార్యా, ప్రాణముతో సమానురాలూ, నిత్యమూ రామునికి హితాన్ని కలిగించేదీ అయిన సీత కూడా రోహిణి చంద్రుణ్ణి అనుసరించినట్లు ఆ రామచంద్రుని అనుసరించి వెళ్లింది.

౮. वने तस्मिन्निवसता जनस्थाननिवासिनाम्।
राक्षसां निहतान्यासन् सहस्राणि चतुर्दश॥

భావం – దండకారణ్యంలో నివసించేటప్పుడు రాముడు జనస్థానంలో నివసించే పద్నాలుగు వేల మంది రాక్షసులను సంహరించాడు.

౯. ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः।
सहायं वरयामास मारीचं नाम राक्षसम्॥

భావం – తనబంధువులైన రాక్షసుల సంహారాన్ని తెలుసుకొన్న రావణుడు క్రోధంతో మూర్ఛిల్లి, తేరుకొని మారీచుడనే రాక్షసుణ్ణి సహాయం కోరాడు.



౧౦. तेन मायाविना दूरमपवाह्य नृपात्मजौ।
जहार भार्यां रामस्य गृध्रं हत्वा जटायुषम्॥

భావం – మాయలమారి అయిన ఆ మారీచుని సహాయంతో ఆ రామలక్ష్మణులను దూరంగా పంపి, జటాయువనే గ్రద్ద అడ్డుపడగా దాన్ని కూడా చంపి ఆ రావణుడు సీతను అపహరించాడు.



११.	स मार्गमाणस्तां देवीं रामस्सीतामनिन्दिताम्।
पम्पातीरे हनुमता सङ्गतो वानरेण ह॥
हनुमद्वचनाच्चैव सुग्रीवेण समागतः।

భావం - రాముడు సాధ్వియైన ఆ సీతాదేవిని వెదకుచూ పంప అనే నది ఒడ్డున హనుమంతుడనే వానరుణ్ణి కలిసాడు. హనుమంతుని సూచనమేరకు సుగ్రీవుణ్ణి కలిసాడు.

१२.	ततः सुग्रीववचनाद्धत्वा वालिनमाहवे।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्॥

భావం - రాముడు సుగ్రీవుని ప్రార్థన ప్రకారం వాలిని సంహరించి, అతని రాజ్యానికి సుగ్రీవుణ్ణి రాజుగా చేసెను.

१३.	स च सर्वान् समानीय वानरान् वानरर्षभः।
दिशः प्रस्थापयामास दिदृक्षुः जनकात्मजाम्॥

భావం - వానరశ్రేష్ఠుడైన సుగ్రీవుడు వానరులందరినీ రప్పించి సీతాదేవిని అన్వేషించటానికై అన్ని దిక్కులకు పంపాడు.





# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठ्यांशचित्रे किं किम् अस्ति?

आ. रामस्य गुणान् वदन्तु?

इ. रामः केन सह मिलितवान्? किमर्थम्?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. श्लोकान् पठन्तु।

आ. श्लोकानां भावान् पठन्तु।

इ. पाठे वर्णितानां नामानि चित्वा लिखन्तु।

ई. अधः दत्तानि पदानि पठन्तु। पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। श्लोकभावान् दृष्ट्वा तेषाम् अर्थान् अवगच्छन्तु।

| | | | | |
|---|---|---|---|---|
| प्रियकाम्यया | विनयसम्पन्नः | श्रेष्ठम् | प्राणसमाहिता | महीपतिः |
| जनस्थानम् | यौवराज्येन | सहस्राणि | विवासनम् | क्रोधमूर्छितः |
| अभिषेचनम् | ज्ञातिवधम् | सत्यवचनात् | नृपात्मजौ | धर्मपाशेन |
| मायाविना | प्रतिज्ञाम् | मार्गमाणः | पितुर्वचननिर्देशात् | समागतः |

उ. अधः दत्तानां वाक्यानां भावमनुसृत्य श्लोकानाम् अधः रेखाङ्कनं कुर्वन्तु।

1. రాముడితో సీత అరణ్యమునకు వెళ్ళింది.
2. కైకేయి వరములు కోరింది.
3. రావణుడు సీతను అపహరించాడు.
4. లక్ష్మణుడు అన్నను అనుసరించాడు.
5. రాముడు రాక్షసులను చంపాడు.
6. రామసుగ్రీవులు మిత్రులైనారు.

ऊ. भावं दृष्ट्वा वाक्यानि योजयन्तु।

| | |
|---|---|
| १. यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः। | అ. రాముడికి అరణ్యవాసం, భరతుడికి పట్టాభిషేకం. |
| २. स जगाम वनं वीरः प्रतिज्ञामनुपालयन्। | ఆ. పంపానదీ తీరమున హనుమంతునితో కలిసాడు. |
| ३. पम्पातीरे हनुमता सङ्गतो वानरेण ह। | ఇ. యువరాజు పట్టాభిషేకం ప్రీతితో చేయదలిచాడు. |
| ४. विवासनं च रामस्य भरतस्याभिषेचनम्। | ఈ. తండ్రిమాట జవదాటకుండా అరణ్యానికి వెళ్లాడు. |

SCERT TELANGANA

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. रामस्य वनगमनम् अधिकृत्य लिखन्तु।

२. दशरथः किमर्थं रामं राजानं कर्तुम् ऐच्छत्?

३. कैकयी किम् अयाचत?

४. रामः किमर्थं वनं गतवान्?

५. रावणः कीदृशः?

६. केन कारणेन सीता अपहृता?



### आ. चिन्तयन्तु, लिखन्तु

१. श्रीरामस्य स्वभावः कीदृशः?

२. केन कारणेन रावणः क्रोधमूर्छितः अभवत्?

३. रावणः किं कृतवान्?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः दत्तेषु पदेषु एकैकस्य पदस्य अन्तिमाक्षरम् उपयुज्य अनन्तरपदं लिखन्तु।

| | | | | |
|---|---|---|---|---|
| वनम् | नगरम् | ततः | मकरन्दम् | तातः |
| तद्राज्ये | महीपतिः | रामः | यौवनम् | दुहिता |

उदा :- **वनम्, महीपतिः,----**

### आ. पाठे विद्यमानपात्राणां नामानि अधः पेटिकायां दत्तानि। तानि अन्विष्य लिखन्तु।

| | | | | | | |
|---|---|---|---|---|---|---|
| कै | के | यी | युः | ल | क्ष्म | णः |
| ❁ | ❁ | टा | रा | मः | द | त्रा |
| ज | ज | ल | व | ग | श | मि |
| कौ | न | ❁ | णः | यः | र | सु |
| स | त | का | ने | ❁ | थः | ग्री |
| ल्या | ❁ | अ | त्म | च | ❁ | वः |
| ❁ | आ | ❁ | र | जा | लिः | वा |

लक्ष्मणः ................ ................

................ ................

................ ................

................ ................

................ ................

................ ................

................ ................

SCERT TELANGANA

## ५. व्याकरणांशाः



**अ. उदाहरणानुसारं कोष्ठकस्थपदानि षष्ठीविभक्तौ परिवर्त्य आवरणे दत्तानां पदानां साहाय्येन वाक्यं पूरयन्तु।**

| पुत्रः, निवासी, अग्रजः, पतिः, शिष्यः, संहारकः, स्वामी, शत्रुः, मित्रम् |
|---|



श्रीरामः

| | | |
|---|---|---|
| उदा - दशरथस्य | (दशरथः) | पुत्रः |
| ...................... | (सुग्रीवः) | .............. |
| ...................... | (आञ्जनेयः) | .............. |
| ...................... | (विश्वामित्रः) | .............. |
| ...................... | (रावणः) | .............. |
| ...................... | (कौसल्या) | .............. |
| ...................... | (सीता) | .............. |
| ...................... | (अयोध्या) | .............. |
| ...................... | (राक्षसाः) | .............. |
| ...................... | (भरतलक्ष्मणशत्रुघ्नाः) | ........... |
| ...................... | (कौसल्यासुमित्राकैकेय्यः) | ......... |

SCERT TELANGANA

**आ. उमाशब्दं षष्ठीविभक्तौ परिवर्त्य कोष्ठकस्थपदानि उपयुज्य वाक्यानि लिखन्तु।**

| पतिः, द्वितीयपुत्रः, प्रथमपुत्रः, वाहनम् |
|---|



उदा. उमायाः पतिः शङ्करः

**इ. अधः दत्तानि पदानि पठन्तु एतानि षष्ठीविभक्तेः रूपाणि।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **पुंलिङ्गे** | रामस्य | रामयोः | रामाणाम् |
| | भरतस्य | भरतयोः | भरतानाम् |
| | तस्य | तयोः | तेषाम् |
| | मम | आवयोः | अस्माकम् |
| | तव | युवयोः | युष्माकम् |
| **स्त्रीलिङ्गे** | सीतायाः | सीतयोः | सीतानाम् |
| | रमायाः | रमयोः | रमाणाम् |
| | लतायाः | लतयोः | लतानाम् |
| **नपुंसकलिङ्गे** | पुष्पस्य | पुष्पयोः | पुष्पाणाम् |
| | मित्रस्य | मित्रयोः | मित्राणाम् |
| | सङ्गणकस्य | सङ्गणकयोः | सङ्गणकानाम् |

**उ. अत्र कानिचन वाक्यानि दत्तानि। कोष्ठकस्थानां पदानां बहुवचनरूपैः तानि वाक्यानि पूरयन्तु।**

(मम) .................. गृहं दूरे अस्ति। (मम) .................. गृहे चत्वारः जनाः सन्ति। (मम) ................. गृहप्राङ्गणे बहवः वृक्षाः सन्ति। (वृक्षस्य) ................... उपरि बहवः शुकाः उपविशन्ति। तेषां (शुकस्य) .................. चञ्चवः रक्तवर्णाः भवन्ति। ते शुकाः (वृक्षशाखायाः) ......... ............ मध्ये क्रीडन्ति। गृहप्राङ्गणे (लतायाः) .............. पुष्पाणि सुगन्धं यच्छन्ति। (मानवस्य) ...................... जीवने प्रकृतिः अपि अन्तर्भवति किल !

## ६. सर्जनात्मकव्यक्तीकरणम्



**अ. अधः दत्तस्य वाक्यद्वयस्य आधारेण सम्भाषणं लिखन्तु।**

१. कैकेयी वरं पृच्छति।
२. रामः अरण्यं गच्छति।

## ७. परियोजनाकार्यम्



**अ. पाठस्य श्लोकानाम् आधारेण एकैकस्य श्लोकस्य एकैकं चित्रं सङ्कलय्य भित्तिपत्रे स्थापयन्तु।**

## ८. प्रशंसा



रमेशः - नमस्कारः। मम नाम रमेशः। अस्मिन् विद्यालये नूतनतया प्रविष्टः। षष्ठकक्ष्यायाः प्रकोष्ठः कुत्रास्ति?

सुधीरः - मम नाम सुधीरः। अहं षष्ठकक्ष्यायामेव पठामि। षष्ठकक्ष्यायाः प्रकोष्ठः तत्र अस्ति।

चैतन्यः - मम नाम चैतन्यः। अहमत्रैव पञ्चमकक्ष्यां पठितवान्। इदानीं षष्ठकक्ष्यायां प्रविष्टवान्। अद्यारभ्य वयं स्नेहिताः।

सुधीरः - रमेश! सङ्कोचः मास्तु। किमपि साहाय्यम् आवश्यकं चेत् मां पृच्छतु।

रमेशः - धन्यवादाः।

(भवन्तः कक्ष्यायां प्रविष्टान् नूतनान् कथं सहकुर्वन्ति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. श्लोकानां भावान् स्वीयवाक्यैः वक्तुं शक्नोमि। | | | |
| ३. श्रीरामस्य स्वभावम् अधिकृत्य लेखितुं शक्नोमि। | | | |
| ४. सूचनानुसारं सम्भाषणं लेखितुं शक्नोमि । | | | |

**लोके धर्मः कीर्तिः द्वयं स्थिरम्**

SCERT TELANGANA

द्वितीयभागः

षष्ठः पाठः

# ६. परिवर्तनम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रस्थं सन्दर्भं पाठशालायां कदापि दृष्टवन्तः वा?
२. अत्र के किं कुर्वन्ति?
३. बालकः किं सूचयति?

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।



सुधीरः षष्ठकक्ष्यायाः छात्रः। सः बहुबुद्धिमान् चपलः च। वृक्षकाणां छेदनं, लतानां भञ्जनं, पुष्पाणां त्रोटनं च तस्य प्रियकरं नित्यकार्यम्। पठने तु सः कक्ष्यायां सर्वदा सर्वप्रथमः। अतः प्रधानाध्यपकः तस्य चपलकार्याणि दृष्ट्वापि तं तीक्ष्णतया न दण्डयति स्म। तं तादृशकार्येभ्यः केवलं भर्त्सनेन निवारयति स्म। परं सुधीरस्य एषा दुष्टा प्रवृत्तिः कथं दूरीकरणीया इति चिन्ता प्रधानाध्यापकं पीडयति स्म एव।

शालायाः ग्रीष्मविरामाः प्रारब्धाः। सुधीरः महता उत्साहेन पितृभ्यां सह मातामह्याः ग्रामम् अगच्छत्। ग्रामे मातामहस्य एकं विशालम् आम्रवनम् अस्ति। एकस्मिन् दिने पित्रा सह आम्रवनं द्रष्टुं गतः सुधीरः तत्र आश्चर्यकरं दृश्यम् अपश्यत्। तत्र नवतिवर्षीयः मातामहः गर्तानि कुर्वन् तेषु आम्रवृक्षकान् रोपयन् अस्ति। मातामहस्य तत् कार्यं दृष्ट्वा आश्चर्यम् अनुभवन् सुधीरः तम् एवम् अपृच्छत्। ''मातामह! भवान् इदानीम् आम्रवृक्षकान् रोपयन् अस्ति। एते वृक्षकाः वृक्षाः भूत्वा यावत् फलानि दास्यन्ति तावत्पर्यन्तं भवान् जीविष्यति किम्?''



मातामहः शान्तेन मनसा एव इत्थम् अवोचत् - 'सुधीर! अस्माकं पितृपितामहैः पूर्वं रोपितानाम् आम्रवृक्षाणाम् फलानि अद्य पर्यन्तं खादामि। अतः मम वंशीयानाम् सामाजिकानां च खादनार्थं मया आम्रवृक्षाः रोपणीयाः एव खलु ! स्वयमेव फलानि खादितुं वृक्षारोपणं केवलं स्वार्थः भवति, न अन्यः।

एते सर्वेऽपि आम्रवृक्षाः केन स्वार्थेन स्वफलानि परेभ्यः यच्छन्ति? अन्येषां कृते निःस्वार्थतया कार्यकरणम् अस्माकं दायित्वमिति किं भवान् न जानाति? सुधीर ! अस्माकं दायित्वं कीदृशं स्यादिति एते फलवृक्षादयः अस्मान् बोधयन्ति।

तया घटनया सुधीरस्य मनः परिवर्तितम् अभवत्। सः स्वस्य दायित्वं किमिति स्पष्टं ज्ञातवान्।

बालाः! भवन्तः अपि सुधीरः इव स्वीयानि दायित्वानि जानन्ति किम्?

SCERT TELANGANA





# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. भवन्तः कदापि आम्रवनम् अपश्यन् वा? तत् कथं भवति?

आ. के के वृक्षाः भवताम् इष्टाः?

इ. भवतां विद्यालये गृहसमीपे च के के वृक्षाः सन्ति?

ई. वृक्षः, वृक्षकः - एतयोः भेदः कः?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. भिन्नपदं चित्वा वर्तुलेन अङ्कयन्तु।

| | | | | |
|---|---|---|---|---|
| उदा - | छेदनम् | (रोपणम्) | त्रोटनम् | भक्षणम् |
| १. | तादृशम् | ईदृशम् | एतादृशम् | कीदृशम् |
| २. | प्रथमः | तृतीयः | अन्तिमः | नवतिः |
| ३. | आम्रम् | सेवम् | नारङ्गम् | पेरुकम् |
| ४. | वृक्षाः | दलानि | फलानि | पुष्पाणि |
| ५. | माता | पिता | मातामहः | मातामही |

आ. अधः दत्तानि भावयुक्तवाक्यानि पाठे अन्विष्य लिखन्तु।

1. గ్రామంలో తాతగారికి పెద్ద మామిడితోట ఉంది.
2. ఈ మొక్కలు చెట్లై ఎప్పటికి పండ్లనిస్తాయో? అంతవరకూ నువ్వు బతికుంటావా !
3. కాని సుధీరునికున్న ఈ చెడ్డ అలవాటును ఎలా దూరం చేయాలి అనే ఆలోచన ప్రధానోపాధ్యాయుడిని పీడిస్తూ ఉండేది.

इ. यस्मिन् परिच्छेदे मातामहस्य वचनानि सन्ति तं परिच्छेदं धारालतया पठन्तु। तस्य भावं लिखन्तु।

ई. रेखाङ्कितानि पदानि समुचितप्रदेशे संस्थाप्य वाक्यानि पुनर्लिखन्तु।

ग्रामे गर्तानि कुर्वन् एकं वर्षीयः आम्रवनम् अस्ति। एकस्मिन् दिने मातामहस्य आम्रवनं द्रष्टुं गतः सुधीरः विशालम् दृश्यमपश्यत्। तत्र नवति आश्चर्यकरं मातामहः पित्रा सह तेषु आम्रवृक्षकान् रोपयन् अस्ति।

SCERT TELANGANA

**उ. अधः दत्तेषु वाक्येषु किं सत्यं किम् असत्यमिति सूचयन्तु।**

अ. सुधीरस्य मातामहस्य वृत्तिः कृषिः। ................

आ. तस्य मातामहः आम्रवृक्षकान् रोपयन् अस्ति। ................

इ. सुधीरः सहजतया दुष्टः। ................

ई. सुधीरः मात्रा सह ग्रामं गतवान् । ................

## ३. लेखनं, स्वीयरचना



**अ. पठन्तु, लिखन्तु**

१. सुधीरस्य दुष्टा प्रवृत्तिः का?

२. प्रधानाध्यापकः सुधीरं किमर्थं न दण्डयति स्म?

३. वृक्षाः फलानि किमर्थं यच्छन्ति?

४. वृक्षारोपणविषये कः स्वार्थः? कः निस्स्वार्थः?

५. सुधीरः स्वस्य दुष्टप्रवृत्तिं कदा त्यक्तवान्?



**आ. चिन्तयन्तु, लिखन्तु**

१. सुधीरः कीदृशः?

२. ''सुधीरः स्वस्य दायित्वं ज्ञातवान् '' इति पाठे अस्ति। किं तत् दायित्वम्?

३. सुधीरस्य मातामहः स्वीयदायित्वं कथं निर्वर्तितवान्?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



**अ. वृक्षाः फलानि यच्छन्ति। ते अन्यत् किं किं यच्छन्ति? स्वीयवाक्यैः लिखन्तु।**

**आ. केषां वृक्षाणां वनं भवितुम् अर्हति? तेषां नामानि लिखन्तु।**

उदा - आम्रवनम्

**इ. कानिचन पदानि स्वीकृत्य मित्रेण सह परस्परम् उक्तलेखनम् लिखन्तु। समीकुर्वन्तु।**

## ५. व्याकरणांशाः



**अ. अधः दत्तानि चित्राणि पश्यन्तु। वाक्यानि पठन्तु।**



भटः



अश्वः



भटः अश्वात् पतति।



कृषकः



ग्रामः



कृषकः ग्रामात् आगच्छति।


वृक्षः


आम्रम्


<u>वृक्षात्</u> आम्रं पतति।


बालिका


विद्यालयः


बालिका <u>विद्यालयात्</u> आगच्छति।


महिला


पाकशाला


महिला <u>पाकशालायाः</u> आगच्छति।


मुनिवरः


नदी


मुनिवरः <u>नद्याः</u> आगच्छति।

☞ **उपरितनेषु वाक्येषु रेखाङ्कितानि पदानि पञ्चमीविभक्तेः रूपाणि।**

**आ. उदाहरणानुसारं रिक्तस्थानेषु समुचितवाक्यानि लिखन्तु।**

| | | | |
|---|---|---|---|
| **उदा।। वृक्षः** | **पत्रम्** | **-** | **वृक्षात् पत्रं पतति।** |
| १. हस्तः | सुधाखण्डम् | - | .......................... |
| २. अश्वः | बालकः | - | .......................... |
| ३. आकाशः | जलम् | - | .......................... |
| **उदा।। अध्यापिका** | **पुस्तकालयः** | **-** | **अध्यापिका पुस्तकालयात् आगच्छति।** |
| १. मित्रं | ग्रामः | - | .......................... |
| २. छात्रा | प्रवासः | - | .......................... |
| ३. मूषकः | बिलम् | - | .......................... |
| ४. गृहिणी | गृहम् | - | .......................... |

**इ. अधः दत्तानि पदानि पठन्तु । एतानि पञ्चमीविभक्तेः रूपाणि।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **पुंलिङ्गे** | रामात् | रामाभ्याम् | रामेभ्यः |
| | बालात् | बालाभ्याम् | बालेभ्यः |
| | दीपात् | दीपाभ्याम् | दीपेभ्यः |

SCERT TELANGANA

| | | | |
|---|---|---|---|
| **स्त्रीलिङ्गे** | बालिकायाः | बालिकाभ्याम् | बालिकाभ्यः |
| | लतायाः | लताभ्याम् | लताभ्यः |
| | मालायाः | मालाभ्याम् | मालाभ्यः |
| **नपुंसकलिङ्गे** | फलात् | फलाभ्याम् | फलेभ्यः |
| | पुस्तकात् | पुस्तकाभ्याम् | पुस्तकेभ्यः |
| | पत्रात् | पत्राभ्याम् | पत्रेभ्यः |

## ६. सर्जनात्मकव्यक्तीकरणम्



१. पाठे 'सुधीरस्य मनः परिवर्तितम् अभवत्' इति अस्ति। परिवर्तनानन्तरं सः स्वगृहमागत्य किं किं कृतवान् स्यादिति ऊहित्वा लिखन्तु।
२. पाठेऽस्मिन् प्रथमपरिच्छेदं सम्भाषणरूपेण लिखन्तु।
३. वृक्षाणां विषये भवतः किं प्रियकरं किमप्रियकरम् इति विचिन्त्य लिखन्तु।

## ७. परियोजनाकार्यम्



१. एकैकं वृक्षकम् आनीय पाठशालायाः प्राङ्गणे रोपयन्तु।
२. एकैकस्य वृक्षकस्य नामकरणं कृत्वा तस्य वर्धनस्य दायित्वं स्वीकुर्वन्तु।

## ८. प्रशंसा



दुर्गा - गीते! भवत्या वर्धिता लता अद्य पुष्पाणि यच्छति। एतानि पुष्पाणि बहुसुन्दराणि दृश्यन्ते।
गीता - दुर्गे! धन्यवादाः। भवती एतस्याः लतायाः आलवाले रक्तमृत्तिकां स्थापितवती। तदनन्तरमेव लता एवं वर्धते। एतदर्थं पुनः धन्यवादाः।
दुर्गा - स्वागतम्।
(यः कोऽपि एवं लतां, वृक्षकं वा पोषयति चेत् भवती किं करोति?)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. सुधीरस्य स्वभावं वक्तुं शक्नोमि । | | | |
| ३. दत्तानि भावयुक्तवाक्यानि पाठे अन्विष्य लेखितुं शक्नोमि। | | | |
| ४. पाठेऽस्मिन् प्रथमपरिच्छेदं सम्भाषणरूपेण लेखितुं शक्नोमि। | | | |

SCERT TELANGANA

द्वितीयभागः

पठन्तु - नन्दन्तु

# बलवान् कः?



पुरातनकाले याज्ञवल्क्यः नाम महर्षिः आसीत्। सः कदाचित् श्येनमुखात् पतिताम् एकां मूषिकाम् अपश्यत्। करुणया सः तां मूषिकां स्वाश्रमम् अनयत्। तत्र मन्त्रबलेन तां कन्यकाम् अकरोत्। याज्ञवल्क्यस्य अपत्यानि न आसन्। अतः सः तां कन्यकां स्वपुत्रीम् इव अपालयत्।

कालान्तरे सा कन्यका विवाहयोग्या अभवत्। याज्ञवल्क्यः सूर्येण सह तस्याः विवाहं कारयितुम् ऐच्छत्। अतः सः पुत्रीम् अपृच्छत्। ''भवती किं सूर्यं परिणेष्यति?'' इति। तदा सा अवदत् - ''अहं सूर्यस्य तापं सोढुं न शक्नोमि। अतः इतोऽपि उत्तमम् अन्यं वरं भवान् सूचयतु'' इति।।

ऋषिः सूर्यम् एवम् अपृच्छत् '' भगवन् ! मम कन्यकां परिणेतुं भवतः अपेक्षया उत्तमः वरः कः?'' इति। सूर्यः अवोचत् '' मेघः माम् आच्छाद्य तिष्ठति। सः मम अपेक्षया बलवान्, योग्यः च अपि '' इति। ऋषिः मेघम् आह्वयत्। पुनः पुत्रीम् अपृच्छत्। '' भवती एतं मेघं परिणेष्यति किम्?'' इति। सा अवोचत् '' एतस्य वर्णः कृष्णः। अतः एषः मास्तु। अन्यम् उत्तमं वरं भवान् सूचयतु '' इति।

ऋषिः मेघम् अपृच्छत्। सः अवदत् '' वायुः सहस्रधा मम विभागं करोति। अतः सः एव मम अपेक्षया बलवान् '' इति। ऋषिः वायुम् आह्वयत्। परन्तु पुत्री वायुम् अपि न अङ्गीकृतवती। ''इतोऽपि बलवान् कः अस्ति? इति अपृच्छत् सा। '' अहं पर्वतं कम्पयितुं न शक्नोमि। अतः पर्वतः एव मम अपेक्षया बलवान्'' इति वायुः अवोचत्। अनन्तरम् ऋषिः पर्वतम् आह्वयत्।

परन्तु पर्वतः अवदत् '' यद्यपि अहं वायोः अपेक्षया बलवान्, तथापि मूषकः मम शरीरे सर्वत्र बिलं करोति। अतः मूषकः एव मम अपेक्षया बलवान् ''इति।

ऋषिः मूषकम् आह्वयत्। पुत्रीम् अपृच्छत् '' भवती एतं परिणेष्यति किम्?'' इति। सा सन्तोषेण अङ्गीकृतवती। अनन्तरं ऋषिः तां कन्यकां पुनः मूषिकां कृत्वा मूषकेण सह तस्याः विवाहम् अकारयत्।

**तृतीयभागः**

सप्तमः पाठः

# ७. गीतोपदेशः

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के के सन्ति? तत्र किं प्रचलति?
२. महाभारतं केषां कथा?
३. नित्यजीवने के के उपदेशं कुर्वन्ति?

**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**



**१. देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।**

భావం - దేవతలను, బ్రాహ్మణులను, గురువులను జ్ఞానులను పూజించడం, శారీరకశుభ్రత, నిజాయితి, బ్రహ్మచర్యం, అహింస అనునవి శారీరిక తపస్సులు.



**२. अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।**

భావం - మనస్సుకు బాధకలిగించనివి, సత్యము, ప్రియము మరియు హితముతో కూడిన మాటలు, నిరంతర అధ్యయనము అనునవి వాచికతపస్సులు.



**३. मनः प्रसादः सौम्यत्वं, मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्येतत् तपो मानसमुच्यते।।**

భావం - నిశ్చల మనస్సు, మృదుత్వము, మౌనము, మనోనిగ్రహము, అంతఃకరణశుద్ధి అనునవి మానసికతపస్సులు.

SCERT TELANGANA

**४. श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम्॥**

భావం - చక్కగా ఇతరుల ధర్మాన్ని పాటించుట కంటె లోపాలు ఉన్నప్పటికీ మన ధర్మాన్ని మనం పాటించటం మంచిది. స్వభావసిద్ధమైన కర్మల నాచరించుట వల్ల పాపం కలగదు.

**५. नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः।**
**शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥**

భావం - అర్జునా ! నీవు చేయవలసిన కర్మలను సక్రమంగా ఆచరించు. ఏ పని చేయకుండా ఉండడంకంటే ఏదో ఒక పనిని చేస్తూ ఉండడం మేలు. పని చేయని సోమరులకు పూట గడవడం కూడ కష్టమే గదా !



**६. यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥**

భావం - పెద్దలు ఎలా ప్రవర్తిస్తారో అలాగే సామాన్యులు ప్రవర్తిస్తారు. సదాచారం పట్ల పెద్దలు ఏర్పరచిన ప్రమాణాన్నే సామాన్యజనులు అనుసరిస్తారు.



SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. एकैकं चित्रं पश्यन्तु। चित्रे के के सन्ति? ते किं किं कुर्वन्ति इति वदन्तु।

आ. एकैकचित्रस्य भावं वदन्तु।

इ. स्वीयवाक्यैः एकस्य श्लोकस्य भावं वदन्तु।

ई. श्लोकभावं चित्रस्य भावेन सह तोलयन्तु।

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् अवगच्छन्तु।

| | | | | |
|---|---|---|---|---|
| अभ्यसनम् | श्रेयान् | आप्नोति | प्रमाणम् | श्रेष्ठः |
| अनुवर्तते | आर्जवम् | वाङ्मयम् | उच्यते | मनःप्रसादः |

आ. सर्वान् श्लोकान् सस्वरं गायन्तु।

इ. तपः कति विधम्?

ई. श्लोकानां भावान् पठित्वा स्वीयवाक्यैः वदन्तु।

उ. श्लोकपादान् योजयन्तु, लिखन्तु।

| | |
|---|---|
| १) देवद्विजगुरुप्राज्ञ | (अ) न प्रसिध्येदकर्मणः |
| २) श्रेयान् स्वधर्मो विगुणः | (आ) तत्तदेवेतरो जनः |
| ३) शरीरयात्रापि च ते | (इ) पूजनं शौचम् आर्जवम् |
| ४) यद्यदाचरति श्रेष्ठः | (ई) तपो मानसमुच्यते |
| ५) भावसंशुद्धिरित्येतत् | (उ) परधर्मात्स्वनुष्ठितात् |

उदा- देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।

ऊ. मञ्जूषातः पदानि चित्वा तत्तत्तपसः अनुगुणं लिखन्तु।

| | | | |
|---|---|---|---|
| देवपूजनं | अनुद्वेगकरं वाक्यं | प्राज्ञपूजनं | प्रसादमनः |
| अहिंसा | सौम्यत्वं | द्विजपूजनं | सत्यवाक्यं |
| मौनं | भावसंशुद्धिः | गुरुपूजनं | स्वाध्यायाभ्यसनं |
| शौचम् | प्रियहितवाक्यं | ब्रह्मचर्यम् | आत्मविनिग्रहः |

SCERT TELANGANA

| शारीरम् | मानसिकम् | वाचिकम् |
| --- | --- | --- |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | |
| .............................. | | |
| .............................. | | |

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. लोकः कम् अनुवर्तते?

२. कः धर्मः श्रेयः? कः धर्मः न आचरणीयः?

३. वाचिकतपः नाम किम्?

४. निरन्तराध्ययनम् नाम किम्?

### आ. पदानि पठन्तु। तेषां समानार्थकसंस्कृतपदानि पाठात् चित्वा अत्र लिखन्तु।

1. మనస్సుకు బాధ కలిగించని సత్యం ....................

2. మృదుత్వం ....................   3. పాపం ....................

4. నిజాయితీ....................   5. నిశ్చలమనస్సు ....................

6. అంతఃకరణం ....................



### इ. चिन्तयन्तु, लिखन्तु

१. अनुद्वेगकरं वाक्यं किमर्थं वक्तव्यम्?

२. स्वाध्यायः नाम कः?

३. मौनं कीदृशेषु सन्दर्भेषु आवश्यकम्?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. मञ्जूषातः पर्यायपदानि चित्त्वा अधः दत्ते स्थाने लिखन्तु।

| | | | | | |
|---|---|---|---|---|---|
| कायः | ब्राह्मणः | उत्तमः | प्रपञ्चः | आर्यः | जगत् |
| विप्रः | भूसुरः | वरः | तनुः | देहः | भुवनम् |

१. द्विजः - .............. ................ ..................

२. शरीरम् - .............. ................ ..................

३. श्रेष्ठः - .............. ................ ..................

४. लोकः - .............. ................ ..................

### आ. अधः दत्तेषु पदेषु पूर्वपदस्य अन्तिमाक्षरम् उपयुज्य अनन्तरपदं लिखन्तु।

| | | | |
|---|---|---|---|
| वाक्यं | तपः | देव | यात्रा |
| प्रसादः | नियतं | मौनम् | कर्म |

उदा :- **कर्म, मौनम्** ---

## ५. व्याकरणांशाः



### अ. उदाहरणानुसारम् अधः दत्तपदानि विघटयन्तु।

उदा - शौचमार्जवम् - शौचम् + आर्जवम्

१. ब्रह्मचर्यमहिंसा - ......................................

२. मौनमात्मविनिग्रहः - ......................................

३. मानसमुच्यते - ......................................

४. स्वाध्यायाभ्यसनम् - ......................................

५. यद्यदाचरति - ......................................

SCERT TELANGANA

आ. एतानि पदानि पठन्तु। तेषां संयोजनम् अवगच्छन्तु।

समर+अङ्गणम् - समराङ्गणम् जल+आशयः - जलाशयः

सुमित्रा+आनन्दवर्धनः- सुमित्रानन्दवर्धनः अति+इन्द्रियः - अतीन्द्रियः

**अधः दत्तानि पदानि योजयन्तु।**

स्नान+अर्थम् - ...........................

स्व+आहारः - ...........................

विद्या+आलयः - ...........................

सुर+अरिः - ...........................

**अधः दत्तानां पदानां विभजनं कुर्वन्तु।**

विद्याभ्यासः - ...........................

प्रधानाध्यापकः - ...........................

कलुषिताहारः - ...........................

स्वाध्यायः - ...........................

**एतानि पदानि सवर्णदीर्घसन्धियुक्तानि।**

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. पाठान्तर्गतस्य षष्ठश्लोकस्य भावानुसारम् एकां कथां लिखन्तु।

आ. भगवद्गीताम् उद्दिश्य भाषणरूपेण वदन्तु।

## ७. परियोजनाकार्यम्



अ. भगवद्गीतायाः अध्यायानां नामानि ज्ञात्वा पट्टिकारूपेण लिखन्तु।

आ. भगवद्गीतायाः श्लोकान् कण्ठस्थीकुर्वन्तु।

SCERT TELANGANA

## ८. प्रशंसा



अम्बा - ललिते ! किमर्थं विलम्बेन आगच्छसि? हस्ते किमेतत्?

ललिता - अम्ब ! एतं पुरस्कारं भगवद्गीतास्पर्धायां प्राप्तवती।

अम्बा - तथा वा ! भगवद्गीता किम् उपदिशति?

ललिता - फलमनपेक्ष्य स्वस्वकार्याणि करणीयानि इति।

अम्बा - उत्तमः भावः।

(भवान्/भवती अपि भगवद्गीतायाः प्राशस्त्यं वदतु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि । | | | |
| २. श्लोकानां भावं वक्तुं शक्नोमि । | | | |
| ३. अनुद्वेगकरवाक्यं किमर्थं वक्तव्यम् इति लेखितुं शक्नोमि। | | | |
| ४. षष्ठश्लोकस्य भावानुसारम् एकां कथां लेखितुं शक्नोमि। | | | |

**सत्यं माता पिता ज्ञानम्**

SCERT TELANGANA

तृतीयभागः

अष्टमः पाठः

# ८. आयुर्वेदः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे के बाधाम् अनुभवन्ति?
२. तेषां कीदृशम् उपचारं कुर्वन्ति?
३. गृहे भवान् कदापि एतादृशम् औषधं स्वीकृतवान् वा?
४. गृहवैद्यं नाम किम्?

**पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।**

शरीरम् उष्णं भवति। नासिकातः जलं स्रवति। शिरोवेदना अपि भवति। तर्हि वयं किं कुर्मः? वैद्यस्य सकाशं गत्वा औषधं स्वीकुर्मः।

कलुषिताहारसेवनं, विलम्बेन शयनं, उत्तमदिनचर्यायाः अपालनमेव ज्वरस्य कारणमिति उक्त्वा रोगस्य औषधं दत्त्वा प्रेषयति वैद्यः।

उत्तमदिनचर्याम्, ऋतूनामनुगुणम् आहारादिसेवननियमान् च यः सम्यक् पालयति सः स्वस्थः भवति। एतेषां विवरणं भारतीयपुरातनवैद्यशास्त्रत्वेन विख्याते आयुर्वेदे उपलभ्यते। शरीरं, पञ्चेन्द्रियाणि, आत्मा इत्येतेषां संयोगः एव आयुः इति, आयुषः विषये विवरणात्मकं शास्त्रम् आयुर्वेदः इति आयुर्वेदस्य निर्वचनम्।

शल्य-शालाक्य-कायचिकित्सा-भूतविद्या-कौमारभृत्य-अगदतन्त्र-रसायन-वाजीकरणानि आयुर्वेदस्य अष्टौ अङ्गानि। वैद्यशास्त्रस्य सम्पूर्णोऽपि विषयः द्विसहस्रवर्षेभ्यः पूर्वतः अस्मिन् शास्त्रे उपलभ्यते इत्यतः विश्वस्य प्रथमचिकित्साशास्त्रम् इति अस्य ख्यातिः। बहूनां वैदिकलौकिकविषयाणां चर्चा अत्र कृता इत्यतः एतत् शास्त्रं पञ्चमवेदत्वेनापि परिगण्यते।

स्वस्थस्य स्वास्थ्यरक्षणोपायाः, रुग्णस्य रोगशमनोपायाः अस्मिन् शास्त्रे सम्यग् विवृताः सन्ति।



चरकसंहिता, सुश्रुतसंहिता इति ग्रन्थौ आयुर्वेदस्य आदिमौ। चरकमुनिना प्रणीता चरकसंहिता विभिन्नरोगान्, रोगशमनोपायान्, औषधानां गुणान्, औषधसेवनक्रमं च विवृणोति। कर्णनासिकादीनां बाह्यावयवानां, हृदयकालेयादीनाम् आन्तरिकावयवानां शस्त्रचिकित्साक्रमं विवृणोति सुश्रुतसंहिता। अतः ग्रन्थद्वयमपि आयुर्वेदग्रन्थेषु मूर्धन्यस्थाने तिष्ठति।



SCERT TELANGANA

अष्टाङ्गहृदयं, शार्ङ्गधरसंहिता, भावप्रकाशः, माधवनिदानम् इत्यादयः बहवः प्रसिद्धाः आयुर्वेदग्रन्थाः संस्कृतभाषायाम् उपलभ्यन्ते।

आयुर्वेदः भारतीयानां नित्यजीवनस्य एकं प्रायोगिकं शास्त्रम्। तत्रत्यान् सर्वान् विषयान् भारतीयाः स्वीयजीवने अनुयन्ति। ततः वयं बहून् रोगनिवारणोपायान् शिक्षितवन्तः। उदाहरणार्थं वयम् आर्द्रकचायसेवनेन ज्वरं, तुलसीदलचर्वणेन कफं, ललाटे चन्दनलेपनेन शिरोवेदनाम्, कृष्णमरीचस्य सेवनेन कासं च निवारयामः। एवम् अस्माकं पूर्वजाः वैद्यस्य साहाय्यं विना प्राथमिकोपचारेण, औषधेन विना व्यवस्थितजीवनशैल्या च रोगनिवारणसमर्थाः अभवन्।

मनुष्यः कथं स्वस्थः भवति इति विषयम् आयुर्वेदः एकेनैव श्लोकेन सङ्क्षेपेण प्रतिपादयति। पश्यन्तु !

**श्लो -** **मितं भुक्त्वा शतं जप्त्वा भुक्त्वा शतपथैः गतैः।**
**वामभागे शयानस्य भिषग्भिः किं प्रयोजनम्?॥**

इत्थं भारतस्य प्राचीनवैद्यशास्त्रत्वेन विख्यातम् इदं शास्त्रम् अस्माभिः सर्वैः भारतीयैः आदरणीयम्, तत्रत्याः सर्वाः सूचनाः आचरणीयाश्च।

SCERT TELANGANA





# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. प्राथमिकचिकित्सारूपेण किं किं कुर्मः?

आ. हरिद्रा किमर्थम् उपयुज्यते?

इ. अनारोग्ये सति अस्माकं ज्योष्ठाः किं कुर्वन्ति?

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। अदृष्ट्वा कति पदानि वक्तुं शक्नुवन्तीति परस्परं पृच्छन्तु।

| | | | |
|---|---|---|---|
| हरिद्रा | आर्द्रकं | कृष्णमरीचः | प्राथमिकचिकित्सा |
| सम्प्रदायः | स्वस्थ्यरक्षणोपायः | शल्यम् | शालाक्यः |
| कायचिकित्सा | भूतविद्या | कौमारभृत्यम् | अगदतन्त्रम् |
| रसायनम् | वाजीकरणम् | चरकसंहिता | सुश्रुतसंहिता |
| अष्टाङ्गहृदयम् | शार्ङ्गधरसंहिता | भावप्रकाशः | |

आ. एतानि पदानि पाठे कुत्र सन्तीति दृष्ट्वा '........' इति चिह्नेन अङ्कयन्तु।

## ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. आयुर्वेदस्य कति अङ्गानि?

२. आयुः इत्युक्ते किम्?

३. मूर्धन्यस्थाने स्थितं ग्रन्थद्वयं किम्?

४. केषाञ्चन आयुर्वेदग्रन्थानां नामानि लिखन्तु?



आ. चिन्तयन्तु, लिखन्तु

१. भवान् ज्वरपीडितः भवति चेत् किं करोति इति स्वीयवाक्यैः लिखतु।

२. प्राथमिकचिकित्साविषये भवान् किं जानाति?

३. पाठस्य विषये स्वाभिप्रायं लिखतु।

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. कोष्ठके कानिचन पदानि दत्तानि। तानि उपयुज्य अधः मञ्जूषायाम् अन्त्याक्षरीक्रीडां क्रीडन्तः पदरचनां कुर्वन्तु।

| | | | | |
|---|---|---|---|---|
| माधवनिदानम् | तुलसीदलम् | नासिका | नागरिकः | चरकसंहिता |
| लशुनम् | कायचिकित्सा | कौमारभृत्यम् | शालाक्यः | दिनचर्या |
| रोगनिवारणम् | आयुर्वेदः | नियमाचरणम् | | |

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| च | | | | | ता | ❀ | | | | | लम् |
| ❀ | | | नम् | ❀ | | | का | ❀ | | | |
| | त्सा | ❀ | शा | | क्यः | ❀ | कौ | | | | त्यम् |
| ❀ | आ | | | दः | ❀ | | | | र्या | ❀ | रो |
| | | | | णम् | ❀ | नि | | | | | णम् |
| ❀ | मा | | | | | नम् | ❀ | | | | कः |

आ. कोष्ठकस्थानि नामानि शरीराङ्गैः सह रेखया मेलयन्तु।

| शिरः | | ललाटः |
|---|---|---|
| केशाः | | नासिका |
| कर्णौ | | ओष्ठौ |
| मुखम् | | जिह्वा |
| नेत्रम् | | दन्ताः |
| कपोलः | | चिबुकम् |
| हस्तः | | अङ्गुली |
| नखाः | | पादः |
| उदरम् | | हृदयम् |



इ. कोष्ठकस्थानि पदानि अधः दत्तस्य सम्बद्धपदस्य पुरतः लिखन्तु।

| | | | | |
|---|---|---|---|---|
| अन्धता | खञ्जता | हृद्रोगाः | शिरोवेदना | लालाजलम् |
| बधिरता | अल्सर् | मूत्ररोगाः | कासः | |

१. हृदयम् ............. २. पादः ............ ३. नेत्रम् ............

४. कर्णः ............ ५. उदरम् ............ ६. शिरः ............

७. मूत्रकोशः ............ ८. कण्ठः ............ ९. जिह्वा ..............

SCERT TELANGANA

इ. अधः केचन शब्दाः दत्ताः सन्ति। तेषां सम्बद्धशब्दान् ऊहित्वा लिखन्तु।




उदा - वैद्यशाला .....................

..................... .....................

..................... .....................

..................... .....................

..................... .....................




उदा - चरकसंहिता .....................

..................... .....................

..................... .....................

..................... .....................

..................... .....................

## ५. व्याकरणांशाः



अ. अत्र आवरणेषु कानिचन पदानि दत्तानि सन्ति। तेषां लृट्लकार - (भविष्यत्काल) रूपाणि रिक्तस्थानेषु लिखन्तु।



माता एवं चिन्तयति।

मासत्रयानन्तरं मम पुत्रः जनिष्यते (जनि)। मन्दं मन्दं ..................... (चल्)। विद्यालयं .................. (गम्), सम्यक् .....................(पठ्)। आयुर्वेदस्नातकः ................ (भव्)। वैद्यः ................ (भव्)। वैद्यसेवां ................ (कर्)। पुरस्कारं कीर्तिं च ................ ( अर्ज )।

SCERT TELANGANA

आ. अधः दत्तानि विभिन्नधातूनां भविष्यत्कालस्य प्रथमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| भविष्यत्काले - | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषे | भविष्यति | भविष्यतः | भविष्यन्ति |
| | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| | नेष्यति | नेष्यतः | नेष्यन्ति |
| | करिष्यति | करिष्यतः | करिष्यन्ति |
| | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| | पास्यति | पास्यतः | पास्यन्ति |
| | खादिष्यति | खादिष्यतः | खादिष्यन्ति |
| | दास्यति | दास्यतः | दास्यन्ति |
| | क्रेष्यति | क्रेष्यतः | क्रेष्यन्ति |

इ. उदाहरणं दृष्ट्वा अधः दत्तानि वर्तमानकालस्य क्रियापदानि भविष्यत्काले परिवर्तयन्तु।

उदा - पठति - पठिष्यति

१. वदति - ................    ४. हसति - ................

२. क्रीडति - ................    ५. पतति - ................

३. चलति - ................    ६. निन्दति - ................

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. भवन्तः यदा रोगपीडिताः अभवन् तदा वैद्यं दृष्टवन्तः स्युरेव। तदा वैद्येन सह किं किं चर्चितवन्तः इति संवादरूपेण लिखन्तु।

## ७. परियोजनाकार्यम्



अ. चित्रं दृष्ट्वा तत्तत् वस्तु प्राथमिकचिकित्सायां कथम् उपयुज्यते इति (ग्रन्थालयस्य / दूरदर्शनस्य साहाय्येन) एकं वाक्यं मातृभाषया लिखन्तु।



आर्द्रकम्



लशुनम्



मधु

SCERT TELANGANA



हरिद्रा



सुधा



जीरकम्



निम्बम्



तुलसी



कृष्णमरीचः

**आ. पञ्च आयुर्वेदग्रन्थानां तेषां लेखकानां च नामानि भित्तिपत्रे लिखित्वा आनयन्तु।**

## ८. प्रशंसा



क्रीडाङ्गणे सर्वे क्रीडन्तः भवन्ति। अकस्मात् सरिता अधः पतति। तस्याः पादे व्रणः भवति। मालती धावित्वा देवमन्दिरतः किमपि आनयति लेपयति च।

शिक्षिका - मालति ! किं लेपयति?

मालती - मधु-तिलतैलं च मेलयित्वा लेपयामि।

शिक्षिका - तेन किं प्रयोजनम् ?

मालती - द्वयं मिलित्वा ''अयोडिन्'' इव कार्यं करोति। व्रणः शीघ्रम् उपशमितः भवति।

शिक्षिका - उत्तमः उपायः। भवती एतत् कथं जानाति?

मालती - गतसप्ताहे एवमेव मम पादे अभवत्। मम मातामही इत्थमेव कृतवती। पश्यतु मम व्रणः न दृश्यते एव। (इति स्वपादं दर्शयति)

(सर्वे मालतीं प्रशंसन्ति)

(तथैव भवतः गृहे स्थितानाम् औषधमयवस्तूनां नामानि वदतु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. आयुर्वेदस्य वैशिष्ट्यं वक्तुं शक्नोमि । | | | |
| ३. पाठस्य विषये स्वाभिप्रायं लेखितुं शक्नोमि । | | | |
| ४. वैद्यरोगिसम्भाषणं लेखितुं शक्नोमि । | | | |

SCERT TELANGANA

तृतीयभागः

नवमः पाठः

# ९. वाटिकां याम

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के के वृक्षाः सन्ति?
२. वृक्षेषु कानि फलानि सन्ति?
३. वृक्षाणाम् उपयोगाः के?
४. निष्फलवृक्षाणाम् उपयोगाः के?

## पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।



लघुबाल ! लघुबाले !
वाटिकां याम
कण्डोलेन रुच्यानि
फलान्यानयाम
||लघु बाल..||

कदलीफलं मह्यम्
बदरीफलं तुभ्यम्
सेवफलानि अनुजाय
द्राक्षागुच्छम् अनुजायै
||लघुबाल..||

पनसफलानि जनकाय
अनानसानि अम्बायै
पितामहाय च स्वादूनि
पितामह्यै च जम्बूनि
||लघुबाल..||

SCERT TELANGANA



दाडिमानि मम कीराय
कपित्थानि गजराजाय
धेनवे च बहुबीजानि
मर्कटाय च आम्राणि
॥लघुबाल...॥

शीतफलानि सीतायै
मधुकर्कटी च रामाय
लक्ष्मणाय नारङ्गाणि
हनूमते च सर्वाणि
॥लघुबाल...॥

- डा. मरुधूरि नरसिंहाचार्युलु



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. फलानां नामानि वदन्तु?

आ. भवन्तः कानि फलानि इच्छन्ति? किमर्थम्?

इ. लघुबालिका कस्मै किं ददाति?

ई. भवतां गृहे/गृहसमीपे के फलवृक्षाः सन्ति?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. एतानि पदानि पठन्तु। गीते अन्विष्य रेखाङ्कितानि कुर्वन्तु।

| | | | | |
|---|---|---|---|---|
| नारङ्गाणि | मह्यम् | आम्राणि | सर्वाणि | तुभ्यम् |
| कपित्थानि | मधुकर्कटी | जम्बूनि | स्वादूनि | द्राक्षागुच्छम् |

आ. गीते फलनामानि सन्ति। तानि चित्रेण योजयित्वा लिखन्तु।

 ................  ................  ................

 ................  ................  ................

 ................  ................  ................

 ................  ................  ................

### ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. सीतारामयोः कानि फलानि समर्पणीयानि?

२. बालाः वाटिकां किमर्थं गच्छन्ति?

३. गजस्य उपरि कः अस्ति?

४. कदली, बदरी, सेवफलानि केभ्यः देयानि?

SCERT TELANGANA



## आ. चिन्तयन्तु, लिखन्तु

१. फलानि केषु सन्दर्भेषु उपकुर्वन्ति?

२. फलखादनेन कानि प्रयोजनानि?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. चित्राणि दृष्ट्वा बन्धुवाचकं पदं लिखन्तु।



### आ. किं फलं कस्मै देयमिति फलचित्रस्य पुरतः लिखन्तु।



SCERT TELANGANA

इ. नारङ्गाणि, मह्यम्, आम्राणि, सर्वाणि, तुभ्यम्, कपित्थानि, मधुकर्कटी, जम्बूनि, स्वादूनि, द्राक्षागुच्छम् इत्येतानि पदानि अदृष्ट्वा लिखन्तु।

ई. एकैकेन फलेन सम्बद्धानि वृक्षपत्रपुष्पनामानि लिखन्तु।

| फलम् | वृक्षः | पत्रम् | पुष्पम् |
|---|---|---|---|
| आम्रम् | | | |
| जम्बू | | | |
| कदली | | | |
| नारङ्गम् | | | |

## ५. व्याकरणांशाः



अ. एतानि वाक्यानि अवगच्छन्तु।

| | | | | |
|---|---|---|---|---|
| १. | बालकः वानराय कदलीफलं ददाति। | वानरः | - | वानराय |
| २. | अम्बा भिक्षुकाय रोटिकां ददाति। | भिक्षुकः | - | भिक्षुकाय |
| ३. | सुजाता रमेशाय लेखनीं ददाति। | रमेशः | - | रमेशाय |
| ४. | जनकः पुत्राय धनं यच्छति। | पुत्रः | - | पुत्राय |
| ५. | सेवकः स्नानाय जलम् आनयति। | स्नानम् | - | स्नानाय |
| ६. | चित्रकारः चित्रलेखनाय धनं स्वीकरोति। | चित्रलेखनम् | - | चित्रलेखनाय |
| ७. | रवये नमः। | रविः | - | रवये |
| ८. | शिशुः अम्बायै रोदिति। | अम्बा | - | अम्बायै |
| ९. | अशोकः अनुजायै भोजनम् आनयति। | अनुजा | - | अनुजायै |
| १०. | नागराजः भगिन्यै स्यूतं यच्छति। | भगिनी | - | भगिन्यै |
| ११. | जनकः पुत्रिकायै सैकिल् यानं क्रीणाति | पुत्रिका | - | पुत्रिकायै |

☞ उपरितनवाक्येषु रेखाङ्कितानि पदानि चतुर्थीविभक्तेः रूपाणि।

SCERT TELANGANA

**आ. चतुर्थीविभक्तिरूपाणि उपयुज्य रिक्तस्थानानि पूरयन्तु।**

१. (मित्रम्) ...................... पुस्तकं यच्छति।

२. (शुनकः) ...................... रोटिकां ददाति।

३. (क्रीडनम्) ...................... क्रीडाङ्गणं गच्छति।

४. (आञ्जनेयः) ...................... नमः।

५. (अर्चनम्) ...................... आलयं आगच्छति।

**इ. अधः दत्तायाः सूच्याः अनुसारम् उदाहरणक्रमेण वाक्यानि वदन्तु।**







**उदा :- माधवः महेशाय कन्दुकं यच्छति।**

**महेशः सन्तोषाय .......।**

**रमा मल्लिकायै वृत्तकन्दुकं क्षिपति।**

**मल्लिका नागप्रियायै .......।**

**उ. आवरणेषु दत्तानि पदानि चतुर्थीविभक्त्यां परिवर्त्य कथां पूरयन्तु।**

रमेशः (कुटुम्बः) ............... नूतनगृहं क्रीतवान्। पण्डिताः गृहे (प्रवेशः) ........... श्वः शुभदिनम् इति उक्तवन्तः। तस्मै (उत्सवः) ................ सः (भार्या) .................. आभरणानि क्रीतवान्। (पुत्रः) .................... नववस्त्राणि आनीतवान्। (स्वभगिनी) ................ नूतनशाटिकाः अनीतवान्। (मित्रं) ............. आह्वानं प्रेषितवान्। (व्रतम्) ............ पूजासामग्रीम् आनीतवान्। (पुरोहितः) ........... अन्यं प्रेषितवान्। (जननी) .............. बस् स्थानकं प्रति वाहनं प्रेषितवान्। सर्वे (शुभमुहूर्तं) .................. प्रतीक्षां कुर्वन्ति।

SCERT TELANGANA

ऊ. अधः दत्तानि पदानि पठन्तु। एतानि चतुर्थीविभक्तेः रूपाणि।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पुंलिङ्गे | अनुजाय | अनुजाभ्याम् | अनुजेभ्यः |
| | जनकाय | जनकाभ्याम् | जनकेभ्यः |
| | कीराय | कीराभ्याम् | कीरेभ्यः |
| | गजाय | गजाभ्याम् | गजेभ्यः |
| स्त्रीलिङ्गे | अनुजायै | अनुजाभ्याम् | अनुजाभ्यः |
| | अम्बायै | अम्बाभ्याम् | अम्बाभ्यः |
| | सीतायै | सीताभ्याम् | सीताभ्यः |
| | पितामह्यै | पितामहीभ्याम् | पितामहीभ्यः |
| नपुंसकलिङ्गे | भवनाय | भवनाभ्याम् | भवनेभ्यः |
| | फलाय | फलाभ्याम् | फलेभ्यः |

ऊ. अधः दत्तानि विभिन्नधातूनां लोट्लकार-प्रथमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। विधि-प्रार्थना-आशीर्वादादिषु अर्थेषु एतेषां क्रियापदानाम् उपयोगः भवति।

| लोट्लकारे - | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषे | भवतु, भवतात् | भवताम् | भवन्तु |
| | पठतु, पठतात् | पठताम् | पठन्तु |
| | लिखतु, लिखतात् | लिखताम् | लिखन्तु |
| | नयतु, नयतात् | नयताम् | नयन्तु |
| | गच्छतु, गच्छतात् | गच्छताम् | गच्छन्तु |
| | खादतु, खादतात् | खादताम् | खादन्तु |
| | पिबतु, पिबतात् | पिबताम् | पिबन्तु |

SCERT TELANGANA

## ६. सर्जनात्मकव्यक्तीकरणम्



भवतः जनकः भवतः कृते अनेकानि क्रीडनकानि, गृहोपकरणानि क्रीतवान्। तेषु कस्य कियत् मूल्यम् अभवत् इति भवान् पृच्छति। जनकः मूल्यं वदति। एतादृशम् एकं सम्भाषणं लिखतु।



## ७. परियोजनाकार्यम्



गणेशपूजार्थम् एकविंशतिपत्राणि आवश्यकानि। तेषां पत्राणां नामानि ज्ञात्वा लिखन्तु। तानि पत्राणि सङ्गृह्य कक्ष्यां प्रति आनयन्तु।

## ८. प्रशंसा



सन्तोषः - भवान् अद्य भोजनार्थम् आहारं न आनीतवान् किम्?

राजकुमारः - प्रातः गृहे अम्बा रोटिकां सज्जीकृत्य दत्तवती। पाठशालां प्रति आगमनसमये एकः भिक्षुकः अन्नाय आक्रोशन् दृष्टः। अतः मया आनीतम् आहारं तस्मै भिक्षुकाय दत्तवान्।

सन्तोषः - अद्य भवान् अत्युत्तमदानं कृतवान्। बुभुक्षिताय भोजनं दत्तवान्। सर्वदानेषु अन्नदानम् उत्तमम्।

(भवान् इतरेषां कृते कथम् उपकारं करोति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. गीतं रागयुक्ततया गातुं शक्नोमि । | | | |
| २. विविधफलानां नामानि संस्कृते वक्तुं शक्नोमि । | | | |
| ३. फलखादनेन प्रयोजनानि लेखितुं शक्नोमि । | | | |
| ४. गीतम् अभिनयं कर्तुं शक्नोमि । | | | |

**विद्यातुराणां न सुखं न निद्रा**

SCERT TELANGANA

दशमः पाठः

# १०. समयस्फूर्तिः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के किं कुर्वन्ति।
२. चित्रे काकः सर्पं किमर्थं मारयितुम् उद्युक्तः?
३. सः कीदृशीं समयस्फूर्तिं प्रदर्शितवान्?

## पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

श्रीकृष्णदेवरायस्य सभायाः ''भुवनविजयम्'' इति नाम। तस्याम् 'अष्टदिग्गजाः' इति प्रसिद्धाः अष्टौ कवयः आसन्। सर्वदिग्भ्यः महापण्डिताः तस्यां सभायाम् आगत्य, स्वीयं नैपुण्यं प्रदर्शयन्ति स्म।

एकदा एकः महान् पण्डितः कृष्णदेवरायस्य सभाम् आगतवान्। सः सभामध्ये एकां घोषणां कृतवान्। ''मम नाम नन्दकभट्टः। अहं काश्मीरदेशीयः। सकलशास्त्राणि पठितवान्। अनेकेषु राज्येषु गत्वा अहं तत्रस्थान् पण्डितान् वादे पराजित्य बहून् पुरस्कारान् प्राप्तवान्। इदानीं भवतः सभायां कविपण्डितैः सह वादं कर्तुम् इच्छामि। भवतः राज्ये मया सह वादं कर्तुं कोऽपि कविपण्डितः सन्नद्धः अस्ति चेत् सः पुरतः आगच्छतु। नो चेत् 'वयं पराजिताः' इति अङ्गीकृत्य मां सम्मानयन्तु।'' इति अवदत्।

राजा श्रीकृष्णदेवरायः सभायां सर्वान् कविपण्डितान् एवम् उक्तवान्। 'हे कविवराः ! नन्दकभट्टं पराजित्य देशप्रतिष्ठां रक्षन्तु' इति। नन्दकभट्टस्य प्रतिभां ज्ञात्वा सप्तकवयः मौनेन स्थितवन्तः। तेषु तेनालिरामकृष्णकविः नन्दकभट्टेन सह वादं कर्तुं सिद्धः अभवत्। परन्तु सः 'अद्य मम स्वास्थ्यं न समीचीनम्। श्वः वादस्पर्धां कर्तुम् इच्छामि' इति अवोचत्।

सायङ्काले रामकृष्णः अन्यवेषं धृत्वा नन्दकभट्टस्य वासं गतवान्। 'महोदय ! रामसुब्बय्य इति मम नाम। अहम् आस्थानरक्षकः। विरामसमये साहित्यं पठामि' इत्युक्त्वा एकं तालपत्रग्रन्थाकारं किमपि वस्तु दर्शयित्वा 'एषः ग्रन्थः तेनालिरामकृष्णमहोदयस्य। इदानीम् एतं तस्मै प्रत्यर्पयितुं गच्छामि। मार्गमध्ये भवतः दर्शनं कर्तुम् आगतवान्' इति अवदत्। तदा नन्दकभट्टः 'आर्य ! तस्य ग्रन्थस्य नाम किम्?' इति पृष्टवान्। 'अस्य नाम तिलकाष्टमहिषबन्धनम्। श्वः एतस्य विषये एव चर्चा भविष्यति' इति उक्त्वा ततः गतवान्।

ततः नन्दकभट्टः अचिन्तयत् - 'एतं ग्रन्थम् अहं न कदापि पठितवान्। न श्रुतवान् च। एतस्य ग्रन्थस्य विषये





चर्चां कर्तुम् अहं तु न समर्थः। अतः तं जेतुम् असमर्थः' इति मत्वा सः पराजयभयेन कमपि अनुक्त्वैव विजयनगरतः पलायनं कृतवान्।

परस्मिन् दिने सभायां नन्दकभट्टः न आगतवान्। सः नगरतः पलायनं कृतवान् इति वार्ता ज्ञाता। महाराजः आश्चर्येण रामकृष्णं पृष्टवान्। रामकृष्णः सर्वं वृत्तान्तं महाराजाय निवेद्य 'सः एनं ग्रन्थं न कदापि दृष्टवान्। अतः पराजयभयेन पलायितवान् ' इत्युक्त्वा 'एषः एव स ग्रन्थः' इति उक्तवान्। तदा महाराजः 'न केवलं सः, वयमपि तं ग्रन्थं न जानीमः। एकवारं दर्शयतु' इति अवदत्। तदा रामकृष्णकविः 'किमपि नास्ति महाराज ! तिलकाष्ठानि महिषबन्धनरज्ज्वा बध्वा नीतवान्। तदेव 'तिलकाष्ठमहिषबन्धनम्' इति उक्तवान्।' तत् श्रुत्वा महाराजेन सह सर्वे अहसन्। श्रीकृष्णदेवरायः रामकृष्णस्य समयस्फूर्तिं प्रशंसितवान्। तं कविं बहुधा सम्मानितवान् च।





# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. कथां स्वीयवाक्यैः वदन्तु।

आ. अस्यां कथायां रामकृष्णकविः कथं व्यवहृतवान्?

इ. भवान्/भवती कदापि एतादृशपरिस्थितौ कथं व्यवहरति? - ऊहित्वा वदतु।

ई. नन्दकभट्टः किं चिन्तयित्वा पलायनं कृतवान्?

उ. अधः दत्तवाक्यानि कैः कं प्रति उक्तानि इति वदन्तु।

१. नन्दकभट्टं पराजित्य देशप्रतिष्ठां रक्षन्तु।
२. तस्य ग्रन्थस्य नाम किम्?
३. श्वः वादस्पर्धां कर्तुम् इच्छामि।
४. श्वः एतस्य विषये एव चर्चा भविष्यति।
५. वयं पराजिताः इति अङ्गीकृत्य मां सम्मानयन्तु।
६. रामसुब्बय्या इति मम नाम।

SCERT TELANGANA

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि पदानि पठन्तु। पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् अवगच्छन्तु।

| | | | |
|---|---|---|---|
| सर्वतः | स्वीयं | नैपुण्यम् | महान् |
| श्वः | वादस्पर्धा | पुरतः | मत्वा |
| बहुधा | एकवारं | समीचीनम् | पराजित्य |

आ. घटनानुसारं वाक्यानि क्रमेण लिखन्तु।

१. श्रीकृष्णदेवरायः रामकृष्णकविं बहुधा सम्मानितवान्।
२. श्रीकृष्णदेवरायस्य सभायाम् अष्टदिग्गजाः इति अष्टौ कवयः आसन्।
३. रामकृष्णकविः नन्दकभट्टेन सह वादस्पर्धां कर्तुम् उद्युक्तः आसीत्।
४. ग्रन्थस्य नाम तिलकाष्ठमहिषबन्धनम् इति श्रुत्वा पण्डितः नगरात् पलायनं कृतवान्।
५. तेन सह वादं कर्तुं कोऽपि पण्डितः सन्नद्धः अस्ति वा इति पृष्टवान्।
६. एकदा नन्दकभट्टः नाम एकः महान् पण्डितः सभाम् आगतवान्।

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. नन्दकभट्टः सभायां किमिति घोषणां कृतवान्?

२. रामकृष्णकविः चर्चां श्वः कर्तुम् इच्छामि इति किमर्थम् उक्तवान्?

३. तिलकाष्ठमहिषबन्धनम् नाम किम्?

४. श्रीकृष्णदेवरायः रामकृष्णकविं किमर्थं सम्मानितवान्?



### आ. चिन्तयन्तु, लिखन्तु

१. नन्दकभट्टः कीदृशः?

२. पाठे कः भवतः इष्टः? किमर्थम्?

३. यदि नन्दकभट्टेन समग्रं चिन्तनं क्रियते चेत् किम् अभविष्यत्?

४. कर्गदस्य आगमनात् पूर्वं जनाः केषाम् उपरि लेखनकार्यं कुर्वन्ति स्म?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः दत्ते पदे बहूनि अन्यपदानि सन्ति। तानि अन्विष्य लिखन्तु।

**भु व न वि ज य म्**

उदाः - विजयम्

### आ. अधः दत्तेषु वाक्येषु रेखाङ्कितपदस्य विरुद्धपदं पट्टिकायाम् अस्ति। तत् चित्वा तदेव वाक्यं विरुद्धार्थेन पदेन लिखन्तु।

| |
|---|
| पृष्ठतः |
| मूर्खः |
| तिरस्कारः |
| विकृतम् |
| भक्षकः |

उदा - भुवनविजयसभायां पण्डितः आसीत्। भुवनविजयसभायां मूर्खः न आसीत्।

१. तेनालिरामकृष्णेन पुरस्कारः लब्धः। ....................................

२. अहम् अत्र धनागाररक्षकः। ....................................

३. बस्यानम् मम पुरतः अस्ति। ....................................

४. पूर्णिमायां चन्द्रबिम्बम् सुन्दरं भवति। ....................................

SCERT TELANGANA

## ५. व्याकरणांशाः



**अ. अधः दत्तेषु वाक्येषु एकवचनम् अन्विष्य तस्य बहुवचनरूपं लिखन्तु।**

उदा - बालकः पुस्तकं पठति। बालकाः पुस्तकानि पठन्ति। (अथवा)
बालकः पुस्तकानि पठति।

१. भिक्षुकः भोजनं करोति। ....................................

२. सुषमा चित्रं पश्यति। ....................................

३. सभायां पण्डितः अस्ति। ....................................

४. पाठशालायां बालिका खेलति। ....................................

५. कविः कवितां वदति। ....................................

**आ. अत्र कानिचित् पुंलिङ्गक्तवतुप्रत्ययान्तानि पदानि सन्ति। तेषां स्त्रीलिङ्गरूपं लिखन्तु। तयोः पार्श्वे भूतकाले लङ्रूपाणि सन्ति। उदाहरणं दृष्ट्वा तथापि लिखन्तु।**

| | पुंलिङ्गे | स्त्रीलिङ्गे | भूते लङ् |
|---|---|---|---|
| उदाः- | पठितवान् | पठितवती | अपठत् |
| | लिखितवान् | .............. | ............... |
| | गतवान् | .............. | ............... |
| | पृष्टवान् | .............. | ............... |
| | कृतवान् | .............. | ............... |
| | खादितवान् | .............. | ............... |

## ६. सर्जनात्मकव्यक्तीकरणम्



**इमां कथां नाटकरूपेण मातृभाषया लिखन्तु। अभिनीय प्रदर्शयन्तु।**

## ७. परियोजनाकार्यम्



**श्रीकृष्णदेवरायस्य आस्थाने अष्टदिग्गजाः इति कवयः आसन्। तेषां नामानि - तैः रचितकाव्यानां नामानि सङ्कलय्य भित्तिपत्रिकायां स्थापयन्तु।**

SCERT TELANGANA

## ८. प्रशंसा



गिरीशः - हे गोपाल ! प्रातः अध्यापकः एकाम् उत्तमकथां श्रावितवान्। भवान् प्रातः किमर्थं नागतः?

गोपालः - प्रातः मम अम्बा ज्वरपीडिता आसीत्। वैद्यात् औषधम् आनीय अम्बायै दत्त्वा आगच्छामि। अतः विलम्बः अभवत्। अध्यापकः किमपि दण्डनं करोति इति भयं भवति।

गिरीशः - भवान् उत्तमं कार्यं कृतवान्। मातृसेवापेक्षया श्रेष्ठं किमपि नास्ति।

(भवान्/भवती मातृसेवां कथं करोति?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. कथां स्वीयवाक्यैः वक्तुं शक्नोमि। | | | |
| ३. समयस्फूर्तिः नाम किमिति लेखितुं शक्नोमि । | | | |
| ४. कथां नाटकरूपेण प्रदर्शयितुं शक्नोमि । | | | |

**किं किं न साधयति कल्पलतेव विद्या**

SCERT TELANGANA

तृतीयभागः

पठन्तु - नन्दन्तु

# वेङ्गलप्पस्य अमायिकता



वेङ्गलप्पः अमायिकः। तस्य मातापितरौ तस्मिन् बहु अनुरागं दर्शयतः। अतः तौ दशवर्षीयम् अपि तं विद्यालयं न प्रेषितवन्तौ।

वेङ्गलप्पस्य जनकः किष्टप्पः स्वपुत्रं सर्वेषु कार्येषु योजयति। सः तदा तदा रुच्यान् खाद्यपदार्थान् क्रीत्वा पुत्राय ददाति। एकस्मिन् दिने किष्टप्पः भूचणकान् क्रीत्वा दत्तवान्। भूचणकान् खादितुं पुटकम् उद्घाटयन् वेङ्गलप्पः प्रमादेन सर्वान् अधः पातितवान्। 'रे ! क्रीतं वस्तु स्यूते जागरूकतया स्थापनीयम्। तदानीमेव तत् नष्टं न भवति ' इति पुत्रम् आत्मीयतया उपदिष्टवान् किष्टप्पः।

एकस्मिन् दिने वेङ्गलप्पस्य माता तं - 'रे ! प्रतिवेशिनः गृहं गत्वा पादलीटर्-परिमितं क्षीरम् आनयतु ' इति उक्तवती। वेङ्गलप्पः शीघ्रमेव गत्वा क्षीरम् आनीतवान्। क्षीरं कुत्र? इति पृष्टवती तस्य अम्बा।

"स्यूते पूरयित्वा क्षीरम् आनीतवान् अम्ब! यदा भूचणकाः भूमौ पतिताः तदा पिता स्यूते स्थापितं वस्तु नष्टं न भवति इति उक्तवान्। तत् सम्यक् स्मरणे स्थापितवान्" इति स्वमुखे अमायिकतां दर्शयन् उक्तवान् वेङ्गलप्पः।

किं प्रतिवचनं दातव्यम् इति अम्बा दिग्भ्रान्ता अभवत् । अनन्तरदिने एव वेङ्गलप्पं तस्य पितरौ विद्यालये प्रवेशितवन्तौ।

चतुर्थभागः

एकादशः पाठः

# ११. परिचिन्तय स्वयम्

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. युवकः कुत्र अस्ति?
२. व्याघ्रस्य हस्ते किम् अस्ति?
३. अनेन चित्रेण भवान् किम् अवगच्छति? स्वीयवाक्यैः वदतु?



**पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।**

एकः पण्डितः अरण्यमार्गेण स्वग्रामं गच्छन् आसीत्। सः अरण्ये कञ्चन व्याघ्रं दृष्ट्वा भीतः वृक्षेषु निलीयते स्म। व्याघ्रः तस्य वेषं दृष्ट्वा पण्डितः इति मत्वा .....

व्याघ्रः - ''भोः पण्डित! भयं मास्तु। अहं वृद्धः। चलितुमेव न शक्नोमि। भवतः अपकारं न करोमि। मम हस्ते किञ्चन स्वर्णकङ्कणम् अस्ति। मम प्रश्नानां समाधानानि दत्वा एतं कङ्कणं नयतु'' इति उक्तवान् ।

पण्डितः - (सः चतुरः पण्डितः प्रश्नानां समाधानानि दातुम् ऐच्छत्) ''अस्तु, पृच्छतु''।

व्याघ्रः - **श्लो॥ त्रिनेत्रोऽपि शिवो नास्मि घटो नास्मि जलान्वितः।**
**कूर्चश्मश्रुयुतो नित्यं नरो नास्मि ब्रवीतु माम्॥**

पण्डितः - नारिकेलम्।

व्याघ्रः - उत्तमम्। अन्यं प्रश्नं पृच्छामि।

**श्लो॥ मेघश्यामोऽस्मि न कृष्णो महाकायो न पर्वतः।**
**बलिष्ठोऽस्मि न भीमोऽस्मि कोऽस्म्यहं नासिकाकरः॥**

पण्डितः - हस्ती।





SCERT TELANGANA





व्याघ्रः - बहु उत्तमम्। अन्यः प्रश्नः।

**श्लो॥ स्वच्छाच्छवदनं लोकाः द्रष्टुमिच्छन्ति मे यदा।**
**तत्रात्मानं हि पश्यन्ति खिन्नं भद्रं यथायथम्॥**

पण्डितः - दर्पणम्।

व्याघ्रः - भवान् चतुरः अस्ति। अन्यम् एकं प्रश्नं पृच्छामि।

**श्लो॥ एकचक्षुः न काकोऽयं बिलमिच्छन् न पन्नगः।**
**क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥**

पण्डितः - सूची।

व्याघ्रः - साधु साधु। अन्यः प्रश्नः -

**श्लो॥ अपदो दूरगामी च साक्षरो न च पण्डितः।**
**अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥**

पण्डितः - लेखपत्रम् (इत्येवं समाधानानि वदन् सः पण्डितः पृष्ठतः गच्छन् आसीत्)

व्याघ्रः - भोः पण्डित! भवान् बहु बुद्धिमान्। विना विलम्बं समाधानानि वदति। भवतः समाधानैः अहम् अत्यन्तं सन्तुष्टः। शीघ्रं समीपमागत्य एतं स्वर्णकङ्कणम् स्वीकरोतु।

पण्डितः - ''भोः व्याघ्र! जानामि इति कृत्वा भवतः प्रश्नानां समाधानानि दत्तवान्। अहं लोभी नास्मि। 'स्वार्जितम् एव अनुभोक्तव्यम्' इति पितृवचनमेव अनुपालयामि।''
(इति उक्त्वा पण्डितः ततः वेगेन निर्गतवान्।)



SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. पाठे कयोः सम्भाषणम् अस्ति?

आ. व्याघ्रः कीदृशः?

इ. पण्डितः किमर्थं भीतः?

ई. पण्डितः किमुक्त्वा अरण्यात् निर्गतवान्?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. श्लोकान् गायन्तु, कण्ठस्थीकुर्वन्तु।

आ. प्रहेलिकानां भावम् अवगच्छन्तु।

1. మూడు కన్నులున్న వాడినైనా శివుణ్ణి కాను. కుండను కాకపోయినా నీరున్నదానను. ఎల్లప్పుడు పీచు మీసాలు కలిగి వుంటాను. కాని మానవుణ్ణి కాను. నేనెవరిని?
2. మబ్బు వలె నల్లగా ఉన్నా కృష్ణుణ్ణి కాను. పెద్ద శరీరమున్నా కొండను కాను. బలవంతుడిని కాని భీముణ్ణి కాను, ముక్కు నా చేయి. మరి నేనెవరిని?
3. జనులు నాలో స్వచ్ఛమైన, శుభ్రమైన ముఖాన్ని చూడాలని అనుకుంటారు. కాని తమ ముఖాన్ని చూచుకునే వేళ బాధ గానో, శుభ్రంగానో ఎలా ఉన్నా ఉన్నది ఉన్నట్లు చూస్తారు. ఇంతకు నేనెవరిని?
4. కన్ను ఒక్కటే కాని కాకి కాదు. బిలంలో వుంటుంది కాని పాము కాదు. క్షీణిస్తూ, వృద్ధి చెందుతూ వుంటుంది. కాని చంద్రుడు కాదు. పైకి, క్రిందికి వెళ్తూ వుంటుంది కాని సముద్రం కాదు.ఏమిటది?
5. కాళ్లు లేకున్ననూ సుదూరం పయనిస్తుంది. అక్షరాలు కల్గివున్నా పండితుడు కాదు. ముఖం(నోరు) లేకున్నా స్పష్టంగా మాట్లాడేది ఏది? ఇది తెలిసినవాడు పండితుడు.

इ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् अवगच्छन्तु।

| | | | |
|---|---|---|---|
| एकाकी | कूर्चश्मश्रुः | बिलम् | गूढार्थम् |
| क्षीयते | सन्नद्धः | खिन्नम् | स्वार्जितम् |

SCERT TELANGANA

ई. पाठेऽस्मिन् 'न' इति पदं कतिवारम् आगतम्?

उ. 'मि' इत्यक्षरान्तपदानि पाठे अन्विष्य रेखाङ्कयन्तु।

उदा- इच्छामि।

ऊ. अत्र कानिचन पदानि दत्तानि सन्ति। पाठानुसारं तानि सम्बद्धपदस्य पुरतः लिखन्तु।

शिवः, साक्षरः, मेघश्यामः, घटः, दूरगामी, काकः, महाकायः, बलिष्ठः, नरः, पन्नगः, स्फुटवक्ता, चन्द्रः

| | | | |
|---|---|---|---|
| उदा : गजः | १. मेघश्यामः | २. महाकायः | ३. बलिष्ठः |
| लेखः | १.................. | २.................. | ३.................. |
| सूची | १.................. | २.................. | ३.................. |
| नारिकेलम् | १.................. | २.................. | ३.................. |

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. पाठेऽस्मिन् वृद्धः कः?

२. पण्डितः कीदृशं वचनम् अनुपालयति?

३. व्याघ्रः पण्डितं कथं प्रशंसितवान्?



### आ. चिन्तयन्तु, लिखन्तु

१. यदि व्याघ्रः भवतः पुरतः अस्ति तर्हि भवान् किं करिष्यति - इति ऊहित्वा मातृभाषया लिखतु?

२. कथायाः घटनां लिखन्तु।

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. अधः पट्टिकायां पञ्चदशक्रियापदानि सन्ति। तानि अन्विष्य लिखन्तु।

| | | | |
|---|---|---|---|
| य | ग | त | र्त |
| इ | च्छ | म | ये |
| पृ | र | ति | न |
| क | वि | प | स्म |

१. ...............  ९. ...............

२. ...............  १०. ...............

३. ...............  ११. ...............

४. ...............  १२. ...............

५. ...............  १३. ...............

६. ...............  १४. ...............

७. ...............  १५. ...............

८. ...............

## ५. व्याकरणांशाः



अ. अधः दत्तैः प्रश्नवाचकपदैः रिक्तस्थानानि पूरयन्तु।

कः, कुत्र, किमर्थं, किं, कदा, कीदृशः

१. एषः शालां गच्छति।  एषः .................. गच्छति?

२. एषः यानं चालयति।  एषः .................. चालयति?

३. एषः शालां पठितुं गच्छति।  एषः .................. गच्छति?

४. एषः छात्रः।  एषः ..................?

५. एषः उत्तमः छात्रः।  एषः .................. छात्रः?

६. एषः सायङ्काले आगच्छति।  एषः .................. आगच्छति?

SCERT TELANGANA

### आ. एतानि वाक्यानि अवगच्छन्तु।

| | |
|---|---|
| अहं कर्तुं शक्नोमि। | वयं कर्तुं शक्नुमः। |
| अहं पृच्छामि। | वयं पृच्छामः। |
| अहम् इच्छामि। | वयम् इच्छामः। |
| अहम् अस्मि। | वयं स्मः। |

एतानि क्रियारूपाणि वर्तमानकालस्य (लट्लकारस्य) उत्तमपुरुषस्य एकवचन-बहुवचनरूपाणि ।

### आ. अधः दत्तानि विभिन्नधातूनां वर्तमानकालस्य उत्तमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| **वर्तमानकाले-** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **उत्तमपुरुषे** | वदामि | वदावः | वदामः |
| | भवामि | भवावः | भवामः |
| | लिखामि | लिखावः | लिखामः |
| | नयामि | नयावः | नयामः |
| | गच्छामि | गच्छावः | गच्छामः |
| | यच्छामि | यच्छावः | यच्छामः |
| | खादामि | खादावः | खादामः |
| | पिबामि | पिबावः | पिबामः |
| | करोमि | कुर्वः | कुर्मः |
| | अस्मि | स्वः | स्मः |

## ६. सर्जनात्मकव्यक्तीकरणम्



### अ. एतानि पदानि पठन्तु।

१. युतकम्  २. आसन्दः  ३. नयनम्

पाठे दर्शितया शैल्या एतेषाम् समस्याः रचयन्तु। मातृभाषया वदन्तु।

## ७. परियोजनाकार्यम्



**आन्ध्रभाषया निबद्धाः प्रहेलिकाः सङ्गृह्य अध्यापकस्य सहयोगेन तासां भावं ज्ञात्वा लिखन्तु। संस्कृतेन तेषाम् अनुवादं कुर्वन्तु। भित्तिपत्रेषु लिखित्वा लेपयन्तु।**

## ८. प्रशंसा



| | | |
|---|---|---|
| रमेशः | - | भास्कर! अहं काश्चन प्रहेलिकाः पृच्छामि। समाधानानि वदति वा? |
| भास्करः | - | लघुवाक्यैः पृच्छतु। |
| रमेशः | - | तथैव। एकः दीर्घः गजः अस्ति। गजस्य चत्वारः पादाः सन्ति। चत्वारि शिरांसि सन्ति। परं तु पदमेकं न गच्छति। |
| भास्करः | - | मञ्चः, तल्पः, |
| रमेशः | - | उत्तमम्। अन्यत् पृच्छामि। सोदरीद्वयं निर्विरामं गणयति। किं तु प्रतिदिनं द्वादशस्थानानि एव गणयति। किम् एतत्? |
| भास्करः | - | घटिकासूच्यौ। |
| रमेशः | - | भवान् बहु मेधावी। विना विलम्बम् उत्तरं ददाति (इति हस्तचालनं करोति) |

(भवतः कक्ष्यायां स्थितम् एतादृशं बालकम् उद्दिश्य वदतु ।)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | | |
| २. प्रहेलिकानां भावं वक्तुं शक्नोमि । | | | |
| ३. कथायाः घटनां लेखितुं शक्नोमि । | | | |
| ४. सूचनानुसारं प्रहेलिकाः रचयितुं शक्नोमि । | | | |

**न मातुः परदैवतम्**

SCERT TELANGANA

चतुर्थभागः

द्वादशः पाठः

# १२. नवविकासः

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे के के दृश्यन्ते?
२. जन्तुप्रदर्शनशाला नाम किम्?
३. जन्तुप्रदर्शनशालायां के के दृश्यन्ते?
४. सामान्यतः जन्तूनां निवासप्रदेशः कः?

## पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।



विकासराज्यस्य युवराजः नवकुमारः। मन्त्रिकुमारः सुगुणभट्टः तस्य मित्रम्। कदाचित् द्वावपि मृगयार्थम् अरण्यं गतवन्तौ। तत्र मृगान् अनुधावन्तौ मार्गभ्रष्टौ अभवताम्। अतः तौ सूर्यास्तमयसमये उन्नतमेकं वटवृक्षमारुह्य उपविष्टवन्तौ।

अस्तङ्गते च सूर्ये कश्चन मृगराजः तत्रागत्य तस्यैव वटवृक्षस्य अधः उपविष्टवान्। वनवासिनः क्रूराः साधवश्च जन्तवः एकैकशः तत्रागत्य मृगराजं नत्वा उपविष्टवन्तः। वृक्षे उपविष्टौ द्वावपि युवकौ विस्मयेन सर्वं पश्यतः।

सिंहः दीर्घं निश्वस्य ''हे सहचराः! अद्यतनविशेषाः के? इति सर्वान् जन्तून् अपृच्छत्। तदा श्रृगालः - एवम् अवदत् ''प्रभो! अद्यापि बहवः नराः अरण्यं प्रविश्य योजनद्वयपरिमिते स्थले स्थितान् वृक्षान् छित्त्वा नीतवन्तः। अस्माकं मित्रं चित्रकः तान् निरोद्धुं

प्रयत्नं कृतवान्। परन्तु वञ्चकास्ते तमपि जालैर्बध्वा नीतवन्तः'' इति।

ततः भल्लूकः सदैन्यम् एवमवदत् - ''महाराज! पञ्चाशत् योजनपरिमितम् अरण्यम् अद्य दशयोजनपरिमितमेव अभवत्। जनाः सर्वान् तडागानपि आक्रान्तवन्तः। इदानीम् एकः तडागः एव अस्माकमुपयोगी अस्ति। गतसप्ताहे ममानुजः जलपानार्थम् अरण्यान्तं यावत् गतः। सः अद्यावधि न पुनरागतः। एवम् अरण्यमतिक्रम्य गमनं न श्रेयसे भवति। अत्रापि निवासः अस्मादृशानां दुष्करः सञ्जातः'' इति।

''सत्यमेतत्। नरस्वभावम् अजानन् ममापि पुत्राः ह्यः क्षुधया पीडिताः सन्तः मित्रैः सह समीपस्थं कदलीवनम् अगच्छन्। तत्र नराः करदीपप्रकाशैः ढक्कानिनादैश्च कलभानेतान् भायितवन्तः। तेन सर्वे कलभाः भीतास्सन्तः इतस्ततः पलायितवन्तः। इदानीमपि वनं नागताः'' इति गजः सविषादम् अवदत्।



तदा शशकः स्वसमस्यामेवं न्यवेदयत् - ''देव! बलवतां गज-भल्लूक-चित्रकाणामेव स्थितिः एवमस्ति। तर्हि वानर-हरिण-शशकादीनां दुर्बलानामस्माकं विषये किं वक्तव्यम्? अहोरात्रं भयेन जीवामः'' इति।

''अस्मानपि नात्यजन् ते धूर्ताः। कीरान्, मयूरान्, खञ्जान्, कुक्कुटान्, कपोतान् सर्वान् हत्वा खादन्ति। अस्माकं पिञ्छैः चालङ्कुर्वन्ति। अण्डानि च चोरयन्ति।'' इति चटकः सक्रोधमवदत्।

''प्रभो! वयं तु वनान्तरं गच्छामः। यतः अनावृष्टिकारणतः शुष्कप्रायोऽयं तडागः। अस्माकं तु जलमेव जीवनाधारम्'' इत्यवदन् बक-हंस-कच्छपादयः जलजीविनः।





सर्वं श्रुत्वा खिन्नस्सन् सिंहः सविषादम् अवदत् - ‘‘मित्राणि! भवतां वचनेषु सत्यमस्ति। भवतां समस्याः कष्टानि च वास्तविकान्येव। अहमन्यामपि समस्यां ह्यः एव ज्ञातवान्। वनसमीपस्थेन कर्मागारेण त्यक्तं कलुषितं जलं वने प्रवहति। तेनात्र वातावरणं कलुषितं भवति, धूमोऽपि वनमावर्जति। अतः आगामिकाले वयमत्र स्थातुं न शक्नुमः। देशपालकः महाराजः वनस्य, वनवासिनां प्राणिनां च संरक्षणे न किमपि





चिन्तयति। वनविनाशेन न केवलं वन्यप्राणिनां विनाशः, किन्तु अनावृष्टि-वातावरणकालुष्यादिभिः सर्वप्राणिनां विनाशः भवतीति न जानाति। कुशराज्यपालकः राजा वन्यप्राणिभ्यः अभयारण्यम् आयोजितवान्। तत्र न कोऽपि मानवः अन्तः प्रविशति। अतस्तत्र गमिष्यामः, नरेभ्यः संरक्षणं प्राप्स्यामः।’’ इति निर्णयं प्रकटितवान्। तत् श्रुत्वा सर्वे जन्तवः आनन्देन ततः निर्गताः।

जन्तुभाषाप्रवीणः सुगुणभट्टः सर्वं ज्ञात्वा वन्यप्राणिनां समस्याः राजपुत्रम् अकथयत्। सूर्योदयानन्तरं गृहमागतौ तौ युवकौ वने प्रचलितं संवादं महाराजाय उक्तवन्तौ। वनविनाशतः भविष्यमाणान् दुष्परिणामान् विज्ञाय महाराजोऽपि सुविचार्य वनसंरक्षणाय योग्यान् निर्णयान् स्वीकृतवान्। ततः वन्यजीविनः जन्तवः पक्षिणश्च तत्रैव सुखवासमकुर्वन्।

SCERT TELANGANA



# एतानि कुर्वन्तु



## १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. वृक्षस्योपरि कौ स्तः?

आ. तौ वृक्षं किमर्थम् आरूढवन्तौ?

इ. जन्तवः कं विषयमुद्दिश्य सम्भाषणं कुर्वन्ति?

ई. चित्रे काः जन्तुसम्बन्धसमस्याः विद्यन्ते?

उ. चित्रे के के सम्भाषन्ते? कं प्रति सम्भाषन्ते?

ऊ. कथां स्वीयवाक्यैः वदन्तु।

ऋ. अधः दत्तानि वाक्यानि कः कैः सह अवदत्?

१. एवम् अरण्यमतिक्रम्य गमनं न श्रेयसे भवति।

२. अतः तत्र गमिष्यामः।

३. अस्मानपि नात्यजन् ते धूर्ताः।

४. दुर्बलानाम् अस्माकं विषये किं वक्तव्यम्?

५. शुष्कप्रायोऽयं तडागः।

६. इदानीमपि वनं नागताः।

## २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः परिच्छेदे दत्तानि रेखाङ्कितपदानि उचितस्थाने स्थापयन्तु, लिखन्तु।

वनस्य, वनवासिनां प्राणिनां च **वनविनाशेन** न किमपि चिन्तयति। **अनावृष्टिः** न केवलं वन्यप्राणिनां विनाशः किन्तु **जानाति**। वातावरणकालुष्यादिभिः सर्वप्राणिनां विनाशः भवति इति न **संरक्षणे**।

आ. अधः दत्तानि वाक्यानि पठन्तु। तत्समानार्थकानि संस्कृतवाक्यानि पाठे अन्विष्य लिखन्तु।

1. కాని మోసగాళ్ళైన వారు వలలతో బంధించి అతనిని కూడా తీసుకెళ్ళారు.
2. అన్ని చెరువులనూ జనులు ఆక్రమించారు. ఇప్పుడు ఒక చెరువే మనకు ఉపయోగపడుతున్నది.
3. రాత్రింబవళ్ళు భయంతో జీవిస్తున్నాము.
4. మాకైతే నీళ్ళే జీవనాధారం కదా!
5. రాబోయే కాలంలో మన మిక్కడ ఉండలేము.
6. అక్కడ మనుష్యుడెవ్వడూ లోపలికి ప్రవేశించలేడు.

SCERT TELANGANA

### इ. सिंहस्य निर्णयं पठन्तु।

### ई. पाठं पठन्तु, प्रश्नानां समाधानानि वदन्तु। लिखन्तु।

१. पाठे के के जन्तवः सिंहेन सह भाषितवन्तः?

२. भल्लूकस्य अनुजः कुत्र गतवान्? किमर्थम्?

३. छेदनेन अरण्यं कियत् परिमितम् अभवत्?

४. नराः कलभान् कथं भायितवन्तः?

५. जलजीविनः किमर्थं वनान्तरं गन्तुमिच्छन्ति?

६. सिंहः कां समस्यां ज्ञातवान्?

७. अस्माकं पालकः महाराजः असमर्थः इति सिंहः किमर्थम् अवदत्?

८. पाठस्य अन्यत् नाम सूचयन्तु, लिखन्तु।

## ३. लेखनं, स्वीयरचना



### अ. पठन्तु, लिखन्तु

१. अरण्ये चटकादिपक्षिणः कीदृशानि कष्टानि अनुभवन्ति?

२. सिंहः अन्यराज्यं गच्छामः इति अवदत्? अन्यराज्ये किमस्ति? किं नास्ति?

३. पाठे चतुर्थपरिच्छेदं पठन्तु। तस्याधारेण प्रश्नत्रयं लिखन्तु।



### आ. चिन्तयन्तु, लिखन्तु

१. अरण्ये तडागस्य आवश्यकता का?

२. जन्तवः अस्मिन् अरण्ये निवस्तुं किमर्थं न इच्छन्ति?

३. वनविनाशतः भविष्यमाणान् दुष्परिणामान् महाराजः ज्ञातवान्। ते के?

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



### अ. अधः दत्तानि पदानि पठन्तु। तेषाम् अर्थानां पुरतः पदानि लिखन्तु।

सदैन्यम्, खञ्जान्, वनान्तरं, भविष्यमाणम्, मार्गभ्रष्टः, कलभाः, श्रेयसे, कोपेन

| | | | |
|---|---|---|---|
| కౌజుపిట్టలను | -.................. | దీనంగా | -.................. |
| మేలుకొఱకు | -.................. | గున్నఏనుగులు | -.................. |
| వేరొక అడవి | -.................. | జరుగబోవు | -.................. |
| దారి తప్పిన వాడు | -.................. | కోపంతో | -.................. |

SCERT TELANGANA

**आ. समयार्थकपदानि अधः दत्तानि, तेषाम् अर्थान् जानन्तु। तैः पदैः स्वीयवाक्यानि लिखन्तु।**

अद्यतन, इदानीं, गतसप्ताहे, आगामिकाले, सूर्यास्तमयसमये, ह्यः ...

## ५. व्याकरणांशाः



**अ. अधः दत्तानि वाक्यानि ध्यानेन पठन्तु।**

| | | |
|---|---|---|
| रमणः क्रीडति। | रमणः खादति। | रमणः क्रीडित्वा खादति। |
| रमणः पाठशालां गच्छति। | रमणः पठति। | रमणः पाठशालां गत्वा पठति। |

**आ. अधः दत्तानि वाक्यानि योजयित्वा लिखन्तु।**

१. सरला प्रदक्षिणं करोति। देवं नमति।

..........................................................

२. सरला देवं नमति। प्रसादं खादति।

..........................................................

३. सरला प्रसादं खादति। पाठशालां गच्छति।

..........................................................

४. सरला पाठशालां गच्छति। पाठं शृणोति।

..........................................................

५. सरला पाठं शृणोति। टिप्पणीं लिखति।

..........................................................

६. सरला टिप्पणीं लिखति। संस्कृतं पठति।

..........................................................

७. सरला संस्कृतं पठति। क्रीडाङ्गणे खेलति।

..........................................................

SCERT TELANGANA

इ. अधः दत्तानि विभिन्नधातूनां भूतकालस्य उत्तमपुरुषरूपाणि पठन्तु, अवगच्छन्तु। एकवचन-बहुवचनरूपाणि उपयुज्य वाक्यनिर्माणं कुर्वन्तु।

| भूतकाले- | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| उत्तमपुरुषे | अभवम् | अभवाव | अभवाम |
| | अपठम् | अपठाव | अपठाम |
| | अलिखम् | अलिखाव | अलिखाम |
| | अनयम् | अनयाव | अनयाम |
| | अगच्छम् | अगच्छाव | अगच्छाम |
| | अपिबम् | अपिबाव | अपिबाम |
| | अकरवम् | अकरवाव | अकरवाम |
| | आसम् | आस्व | आस्म |

ई. अत्र दत्तानि उदाहरणवाक्यानि दृष्ट्वा अन्यानि वाक्यानि वदन्तु।

अहं गतदिने नगरम् अगच्छम्।　　अहं प्रातः अल्पाहारम् अखादम्।

वयं गतदिने नगरम् अगच्छाम।　　वयं प्रातः अल्पाहारम् अखादाम।

## ६. सर्जनात्मकव्यक्तीकरणम्



अ. पाठं नाटकरूपेण लिखित्वा प्रदर्शयन्तु।

## ७. परियोजनाकार्यम्



अ. अस्माकं राज्यस्य अभयारण्यानां चित्राणि सङ्गृह्य तेषां विवरणं लिखित्वा भित्तिपत्रेषु स्थापयन्तु।

SCERT TELANGANA

## ८. प्रशंसा



अशोकः - (आयासेन) रे प्रशान्त! इदानीं तस्मिन् मार्गे एकं भारवाहनम् दृष्टवान् वा?

प्रशान्तः - मुखभागं दृष्टवान्। किम् अभवत्?

अशोकः - तस्मिन् शुष्कक्षीराः धेनवः आसन्। ताः जन्तुवधकर्मागारं नयन्ति। तत् दुष्कार्यं निरोद्धुं किमपि करणीयम्, किं कुर्मः?

सुब्बरायः - चिन्ता मास्तु। गतसप्ताहे गोरक्षाकार्यक्रमः प्रचलितः किल! तत्समये एकां चलद्वाणीसङ्ख्यां लब्धवान्। सा सङ्ख्या गोवधनिरोधकसमित्याः। इदानीमेव तान् सूचयामः। हरिः ओम्। ........... (सम्भाषणं कृत्वा सूचयति)

अशोकः - सुब्बाराय! उत्तमं कार्यं कृतवान्।

(धेनवः किमर्थं रक्षणीयाः?)





### स्वीयमूल्याङ्कनम्

| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं धारालतया पठितुम् अवगन्तुं शक्नोमि । | | | |
| २. पाठस्य नीतिं/मूल्यं वक्तुं शक्नोमि । | | | |
| ३. वनविनाशतः भविष्यमानान् दुष्परिणामान् लेखितुं शक्नोमि । | | | |
| ४. पाठं नाटकरूपेण प्रदर्शयितुं शक्नोमि । | | | |

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्**

SCERT TELANGANA

चतुर्थभागः

त्रयोदशः पाठः

# १३. युगादिः

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे के किं कुर्वन्ति?
२. चित्रस्य आधारेण किं पर्वदिनम् ऊहितुं शक्यते?
३. भवते कः उत्सवः रोचते? तस्मिन् दिने भवान् किं करोति?

## पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।





(बालः स्वविद्यालयस्यूतं क्षिपन्)

विवेकः - (उत्साहेन) अम्ब! श्वः विद्यालयं न गच्छामि।

अम्बा - किमर्थं न गच्छति?

विवेकः - अम्ब! श्वः संवत्सरादिः खलु!

अम्बा - सत्यम्। श्वः उगादि-उत्सवः अस्ति।

विवेकः - अम्ब! अद्य मम अध्यापकः उगादि-उत्सवस्य विषये बहून् विषयान् उक्तवान्।

महाकविः कालिदासः 'उत्सवप्रियो हि लोकः' इति उक्तवान्। विश्वे सर्वेऽपि मानवाः कमपि उत्सवम् अवश्यमेव आचरन्ति। भारतीयानामस्माकं बहवः उत्सवाः सन्ति। तेषु संवत्सरादिः एकः महान् उत्सवः अयं युगाब्दः, युगादिः इत्यपि कथ्यते। तेलुगुभाषाभाषिणः एतत् पर्वदिनम् उगादिनाम्ना व्यवहरन्ति। एतम् उत्सवं वयम् अस्माकं सांस्कृतिकवर्षस्य प्रथमदिने अर्थात् चैत्रशुक्लप्रतिपदि आचरामः।

अम्बा - सत्यं पुत्र! सर्वेषु उत्सवेषु एषः उत्सवः अत्यन्तं विशिष्टः। अस्मिन् दिने जनाः उषःकाले उत्तिष्ठन्ति। गृहशुद्धिं कुर्वन्ति। आम्रतोरणैः द्वाराणि अलङ्कुर्वन्ति। अभ्यङ्गस्नानं कृत्वा नूतनवस्त्राणि धरन्ति। देवालयं गत्वा विशेषपूजां कुर्वन्ति च।

विवेकः - अम्ब! अस्मिन् दिने मधुर-आम्ल-लवण-कटु-कषाय-तिक्ताः इति षड्रुचियुक्तखाद्यं (उगादिपच्चडिं) खादामः इति शिक्षकः अवदत्। तत्र किं किं भवति?



SCERT TELANGANA



अम्बा - अत्र गुडम्, इक्षुरसः वा, आम्रं, लवणं, कृष्णमरीचं, निम्बपुष्पाणि, तिन्त्रिणीरसः च भवन्ति। एते षड् पदार्थाः षड्रुचीनां द्योतकाः। (एतावति काले पिता कार्यालयतः गृहं प्रविशति।)

पिता - पुत्र! अत्र अन्यः विशेषः अस्ति। अस्मिन् दिने सायङ्काले पञ्चाङ्गश्रवणमिति कार्यक्रमः अनुष्ठीयते। ग्रामस्य पुरोहितः ग्रामजनान् एकत्रीकृत्य संवत्सरस्य शुभाशुभफलानि बोधयति। सर्वे स्वनक्षत्रस्य अनुसारं गोचारफलानि, ग्रहसञ्चारफलानि च ज्ञात्वा शुभाशुभे विचारयन्ति।

विवेकः - जनक! मम शिक्षकः अन्ते उक्तवान् अस्मिन् दिने यत् कर्म क्रियते तदेव आवर्षं क्रियते इति विश्वासेन जनाः शुभकार्ये रताः भवन्ति। उत्सवोऽयं सर्वेषाम् उत्साहवर्धकः।

पिता - ''उत्सवाः समनुष्ठेयाः उत्साहपूर्तये'' इति उक्तिः अस्ति खलु।
(सर्वे उत्तिष्ठन्ति उत्सवाचरणस्य सन्नद्धतां कुर्वन्ति।)

SCERT TELANGANA



## एतानि कुर्वन्तु



### १. श्रुण्वन्तु, विचिन्त्य वदन्तु



अ. सम्भाषणे के के सन्ति?

आ. विवेकं शिक्षकः किं किम् उक्तवान्?

इ. उगादिपर्वदिने भवान्/भवती किं किमाचरति?

ई. चैत्रमासे कः ऋतुः भवति? तस्मिन् मासे वातावरणं कथं भवति?

### २. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु



अ. अधः दत्तानि वाक्यानि उच्चैः पठन्तु।

१. युगादिं चैत्रशुद्धप्रतिपदि आचरामः।

२. षड्-रुचियुक्तम् उगादि-अवलेहं खादामः।

३. उत्सवाः उत्साहपूर्तये समनुष्ठेयाः।

४. भारतीयानामस्माकं बहवः उत्सवाः भवन्ति।

आ. पाठे सम्बोधनप्रथमाविभक्तेः पदानि गणयन्तु। तस्य अधः '............' चिह्नेन चिह्नीकुर्वन्तु।

इ. अस्मिन् पाठे दृष्टानि कठिनानि पदानि अन्विष्य एकत्र लिखन्तु। पदकोशस्य/अध्यापकस्य साहाय्येन तेषाम् अर्थान् जानन्तु।

### ३. लेखनं, स्वीयरचना



अ. पठन्तु, लिखन्तु

१. विवेकस्य विद्यालये विरामः किमर्थं दत्तः?

२. कालिदासस्य उक्तिः का?

३. षड् रुचयः काः?

४. उगादि-अवलेहे कः कः पदार्थः भवति?

५. उत्सवदिने जनाः किं किं कुर्वन्ति?



आ. चिन्तयन्तु, लिखन्तु

१. भवतां गृहे युगादि-उत्सवं कथम् आचरन्ति?

२. भारतीयाः उत्सवदिनानि कथम् आचरन्ति?

३. भवान्/भवती कति उत्सवान् जानाति? तेषां नामानि लिखतु।

४. उत्सवाः किमर्थम्?

SCERT TELANGANA

## ४. पदजालाभिवृद्धिः, भाषाक्रीडाः



अ. पाठे रामः इति पदयुक्तम् एकं धातुरूपम् अस्ति। तत् अन्विष्य अधः लिखन्तु।

| | | | |
|---|---|---|---|
| | | | मः |

अत्र श्लोकस्य प्रथमभागः दत्तः। तत्र रामपदयुक्तानि क्रियापदानि अधः लिखन्तु।

**वने चरामो वसु चाहरामो नदीस्तरामो न भयं स्मरामः।**

१. ................................ २. ................................

३. ................................ ४. ................................

आ. अधः दत्तानां पदानां सम्बद्धपदानि लिखन्तु।







इ. अधः दत्तेषु पदेषु अयुक्तं पदं चिन्वन्तु।

१. शिक्षकः, विद्यालयः, स्यूतः, लोकः।
२. अभ्यङ्गनस्नानम्, गृहशुद्धिः, सायङ्कालः, आम्रतोरणम्।
३. शिक्षकः, विवेकः, अम्बा, पिता।
४. भोजनशाला, कार्यालयः, विद्यालयः, देवालयः।

## ५. व्याकरणांशाः



अ. पदे उचितविभक्तिं योजयित्वा अधः वाक्यानि लिखन्तु।




१. माता .................. ..................।
२. मूर्खः .................. ..................।
३. विद्वान् .................. ..................।
४. गुरुः .................. ..................।
५. सभ्यः .................. ..................।
६. दुर्बुद्धिः .................. ..................।

SCERT TELANGANA

आ. आवरणस्थस्य पदस्य उचितपरिवर्तनं कृत्वा रिक्तस्थानं पूरयन्तु।

१. श्वः ..................... न गच्छामि। (विद्यालयः)
२. शिक्षकः बहून् ..................... उक्तवान्। ( विषयः)
३. मानवाः ..................... अचरन्ति। (उत्सवः)
४. जनाः ................... कुर्वन्ति। (गृहशुद्धिः)
५. गृहस्य द्वाराणि ................. अलङ्कुर्वन्ति। (आम्रतोरणम्)
६. जनाः ................... विचारयन्ति। (शुभाशुभफलम्)

## ६. सर्जनात्मकव्यक्तीकरणम्



भवतां यः उत्सवः प्रियः अस्ति तमुद्दिश्य मित्रं प्रति लेखं लिखन्तु।

## ७. परियोजनाकार्यम्



अ. ग्रन्थालयस्य साहाय्येन ऋतूनाम् अनुगुणम् आयोज्यमानानाम् उत्सवानां सूचीं कुर्वन्तु। प्रत्येकं ऋतोः वैशिष्ट्यं लिखित्वा भित्तिपत्रे लेपयन्तु।

आ. विविधप्रकारान् उत्सवान् भित्तिपत्रे लिखित्वा आनयन्तु।

## ८. प्रशंसा



विद्यालये गीतस्पर्धा भवति। तत्र माधवः एकं गीतं गायति।

माधवः - वसन्त-ऋतुः आयाति वनशोभामपि आनयति।
वर्ष-ऋतुः आयाति नदींस्तडागान् पूरयति।
ग्रीष्म-ऋतुः आयाति परमोष्णतां प्रददाति।
शरद्-ऋतुः आयाति धवलचन्द्रिकाः प्रयच्छति।
हेमन्त-ऋतुः आयाति हिमपातैः रञ्जयति।
शिशिर-ऋतुः आयाति वृक्षपर्णानि पातयति।
एवम् ऋतवः प्रकृत्यां विविधांशान् पुष्णन्ति।
तेन प्रपञ्चे प्राणिनः बहून् लाभान् विन्दन्ति।

शिक्षकः - साधु साधु।

(अन्यभाषासु विद्यमानानि प्रकृतिवर्णनसम्बद्धगीतानि गायन्तु ।)



### स्वीयमूल्याङ्कनम्



| | आम् | न | किञ्चित् |
|---|---|---|---|
| १. पाठं पठितुं शक्नोमि । | | | |
| २. युगादिपर्वदिनस्य वैशिष्ट्यं वक्तुं शक्नोमि । | | | |
| ३. उत्सवाः किमर्थम् आचरन्ति इति लेखितुं शक्नोमि । | | | |
| ४. मित्रं प्रति लेखं लेखितुं शक्नोमि । | | | |

SCERT TELANGANA

चतुर्दशः पाठः

# १४. सुभाषितानि

## चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे वृद्धः कम् उपदेशं करोति?
२. चित्रे बालाः किं चिन्तयन्ति?
३. भवतां ज्ञातानि सुभाषितवाक्यानि वदन्तु?

१. **एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।**
**वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा॥**



**प्रतिपदार्थाः**

| | | |
|---|---|---|
| यथा | - | ఏ విధంగానైతే |
| पुष्पितेन | - | పుష్పించిన |
| सुगन्धिना | - | సువాసన కలది అయిన |
| एकेनापि | - | ఒకే ఒక్క |
| सुवृक्षेण | - | మంచి చెట్టు చేత |
| तत् वनं सर्वम् | - | ఆ వనమంతా |
| वासितम् | - | పరిమళభరితమౌతుందో |
| (तथा | - | అదేవిధంగా) |
| सुपुत्रेण | - | మంచి కుమారుని చేత |
| कुलम् | - | వంశం |
| वासितं भवति | - | ప్రసిద్ధి చెందుతుంది |

भावः - ఒక అడవిలో విరబూసిన, సువాసనలు వెదజల్లే ఒకే ఒక్క చెట్టు పంచే సువాసనలతో అడవంతా ఎలా పరిమళిస్తుందో, అదే విధంగా మంచి కుమారుని చేత వంశం కూడా కీర్తిని పొందుతుంది.

२. **युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि।**
**अयुक्तं नैव च ग्राह्यं साक्षादपि बृहस्पतेः॥**

**प्रतिपदार्थाः**

| | | |
|---|---|---|
| बालाद् अपि | - | చిన్న పిల్లవాడి నుండి అయినా |
| शुकाद् अपि | - | చిలుక నుండి అయినా |
| युक्तियुक्तम् | - | యోగ్యమైన |
| वचः | - | మాట |
| ग्राह्यम् | - | స్వీకరించదగినది |
| साक्षात् | - | నేరుగా |
| बृहस्पतेः अपि | - | బృహస్పతి నుండి అయినా |
| अयुक्तम् | - | యోగ్యం కాని |
| वचः | - | మాట |
| न ग्राह्यम् | - | స్వీకరించదగినది కాదు |




भावः - యోగ్యమైన మాట బాలుడు చెప్పినా వినాలి. చిలుక చెప్పినా వినాలి. యోగ్యం కాని మాట సాక్షాత్తూ దేవగురువైన బృహస్పతి చెప్పినా వినకూడదు.

SCERT TELANGANA

३. ताराणां भूषणं चन्द्रः नराणां भूषणं श्रमः।
छात्राणां भूषणं विद्या शीलं सर्वस्य भूषणम्॥



**प्रतिपदार्थाः**

| | | |
|---|---|---|
| ताराणाम् | - | నక్షత్రాలకు |
| चन्द्रः | - | చంద్రుడు |
| भूषणम् | - | అలంకారం |
